

श्री हेमचन्द्राचार्य

मोहरिते सच्चवयणस्स पलिमंथू ( ठाणंगसुत्त, ५२९ )

# अनुसन्धान - ७७

प्राकृतभाषा अने जैनसाहित्य विषयक संपादन, संशोधन, माहिती वगेरेनी पत्रिका

संपादक : विजयशीलचन्द्रसूरि




कलिकालसर्वज्ञ श्री हेमचन्द्राचार्य
नवम जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि - अमदावाद

JUNE - 2018

मोहरिते सच्चवयणस्स पलिमंथू ( ठाणंगसुत्त, ५२९ )
'मुखरता सत्यवचननी विघातक छे'

# अनुसन्धान

प्राकृतभाषा अने जैनसाहित्य-विषयक
सम्पादन, संशोधन, माहिती वगेरेनी पत्रिका

७७

सम्पादक :
विजयशीलचन्द्रसूरि



श्रीहेमचन्द्राचार्य

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी
स्मृति संस्कार शिक्षणनिधि
अहमदाबाद

जून - २०१९

# अनुसन्धान ७७

आद्य सम्पादक : **डॉ. हरिवल्लभ भायाणी**

सम्पादक : **विजयशीलचन्द्रसूरि**

सम्पर्क : C/o. **अतुल एच. कापडिया**
A-9, जागृति फ्लेट्स, पालडी
महावीर टावर पाछळ, अमदावाद-३८०००७
फोन : ०७९-२६५७४९८१
E-mail : s.samrat2005@gmail.com

प्रकाशक : **कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि, अहमदाबाद**

प्राप्तिस्थान : (१) **आ. श्रीविजयनेमिसूरि जैन स्वाध्याय मन्दिर**
१२, भगतबाग, जैननगर, नवा शारदामन्दिर रोड,
आणंदजी कल्याणजी पेढीनी बाजुमां,
अमदावाद-३८०००७
फोन : ०७९-२६६२२४६५

(२) **सरस्वती पुस्तक भण्डार**
११२, हाथीखाना, रतनपोल,
अमदावाद-३८०००१
फोन : ०७९-२५३५६६९२

प्रति : २५०

मूल्य : ₹ 150-00

मुद्रक : **क्रिश्ना ग्राफिक्स, किरीट हरजीभाई पटेल**
९६६, नारणपुरा जूना गाम, अमदावाद-३८००१३
(फोन: ०७९-२७४९४३९३)

# निवेदन

विद्या-अध्ययनना क्षेत्रे गुजरातमां कारमो दुष्काळ प्रवर्ती रह्यो छे. प्राकृत भाषा, व्याकरण अने साहित्यनुं अध्ययन तथा अध्यापन करनारा विद्यार्थी, अध्यापको के जिज्ञासु केटला ? प्राकृत भाषानुं तुलनात्मक अथवा भाषाशास्त्रीय अध्ययन आजे आपणे त्यां रह्युं छे खरुं ? जेवुं प्राकृतनुं तेवुं अपभ्रंशनुं पण. आपणी गईकाल प्रा. चन्द्रा, डो. भायाणी, पं. मालवणिया समेत अनेक तज्ज्ञ विद्वानोथी भरी भरी हती. आजे तेनो एकादो अवशेष पण नथी जडतो !

हा, परम्परागत पद्धतिथी प्राकृत व्याकरणनुं अध्ययन तथा ग्रन्थोनुं वांचन करनारा-करावनारा साधुओ, साध्वीओ अने जैन अध्यापको अवश्य छे; परन्तु ते बधां पिशेलना प्राकृतव्याकरणथी तथा तेना उपयोग माटेनी सज्जताथी तद्दन वेगळा-विमुख-अजाण ! ध्वनिशास्त्र, भाषाशास्त्र, भाषाना विकास तथा परिवर्तनो इत्यादि साथे तेमने कोई ज लेवादेवा नहि होवानी. कोई नवो के अजाण्यो शब्द आवे अने कोशमां ते न जडे तो ते लोको लाचार बनी रहे.

आवी ज स्थिति संशोधनविद्यानी पण छे. आजे संशोधन क्या छे ? ऊंडुं अध्ययन, अन्वेषण अने मौलिक तारणो के अर्थघटनो के पाठशुद्धि – आ बधुं क्यां छे ? युनिवर्सिटीना सरकारी नियमो प्रयाणे प्राध्यापके अमुक संख्यामां लेखो, निबंधो, शोधलेखो लखवाना होय अने छपावीने तेनी नकलो संस्था समक्ष

रजू करवानी होय; तेना आधारे तेमने डिग्री, होद्दो, अधिकार, पगार वगेरे मळवाना होय; आ दृष्टिथी लखाता लेखोमां संशोधन केटलुं होय, मौलिक चिन्तन के ऊंडुं अध्ययन केटलुं होय, ते तो लेखक पोते, तेना परीक्षको तथा तेनी साथे संकळायेला बधा ज समजता होय छे.

घणीवार लागे के ना पाडवानी, अस्वीकार के नपास करवानी हिम्मत नथी होती तेथी आ बधुं चाली जाय छे; तेनाथी सम्बन्धित लोकोने थोडोक स्थूल लाभ थाय ए खरुं, पण हानि तो विद्याने अने संशोधनना क्षेत्रने ज थाय छे. जो आ रीते वर्तवाथी ज बधा भौतिक लाभो मळी जतां होय तो, बिनजरूरी वेदियावेडा करवानुं कोने पालवे ? आ मनोवलणनुं परिणाम छे के आजे आपणे त्यां विद्यानिष्ठ संशोधनकारोनो प्रायः सर्वथा दुकाळ छे.

डॉ. हसुभाई याज्ञिके श्रीपुण्यविजयचन्द्रक-समारोहमां टकोर करी के 'जेने तेने ऍवोर्ड आपवा जेवो नथी; काळजी राखजो' त्यारे मनमां केटलांक वर्षोथी घूंटातो सवाल होठ पर आवी गयेलो के 'तो हवे आ बधां चन्द्रक कोने आपवानां ?'

हेमचन्द्राचार्य चन्द्रक होय के पुण्यविजयचन्द्रक होय के अन्य एवोर्ड होय, ते शरु कर्या त्यारे एकमात्र भावना हती के आपणे त्यां अनेक सर्वोत्तम कक्षाना पण्डितो-विद्वानो छे, जेमनां विद्याकीय कार्यो अमूल्य-अजोड छे; तेमनुं तथा तेमनी विद्यानुं सन्मान करवुं.

ना, तेमने मददरूप थवानो के तेमना पर उपकार करवानो लेश पण आशय नहोतो. हतो मात्र बहुमाननो भाव.

थोडां वर्षो तो आ भावना ठाठमाठथी फळती रही, अने तेनो हरख पण खूब रह्या कर्यो. परन्तु एक दहाडो ओचिंतुं ज भान थयुं के जेमना माटे नर्युं बहुमान ज जागे ए पेढी तो समाप्त थई गई ! हवे तो रह्यो शून्यावकाश ! आजे आ एवोर्ड कोने आपवा ए प्रश्न एक समस्या बनी रह्यो छे. आना पायामां विद्याध्ययननी बाबतमां आपणे त्यां प्रवर्तती शून्यता ज पडी छे तेम कहेवामां हवे खचकाट थतो नथी.

आ शून्यावकाश क्यारे दूर थशे ?

— शी.

# अनुक्रमणिका


<u>सम्पादन</u>

वाचनाचार्य शीलशेखरगणिविरचिताः
सिद्धहेमव्याकरणकतिपयोदाहरणमयाः स्तवाः ॥
— सं. उपा. विमलकीर्तिविजय गणि १

महोपाध्याय श्रीसोमविजयगणिविरचिता
संस्कृतगेयपञ्चस्तवी ॥ — सं. विजयशीलचन्द्रसूरि ४८

एक संस्कृत स्तुति — सं. विजयशीलचन्द्रसूरि ५४

बे संस्कृत पत्रो — सं. उपा. भुवनचन्द्र ५६

१२ बोल - पट्टक : बालावबोध — सं. मुनि श्रुताङ्गचन्द्रविजय ६५

मंगलदीवो — सं. विजयशीलचन्द्रसूरि ७८

कवि श्रीशुभवीर-कृत
राजनगरसत्क चिन्तामणिपार्श्वनाथ स्तवन
— सं. मुनि मुक्तिश्रमणविजय ७९

करमबत्रीशी तथा बे स्तवनो — **सं. सा. समयप्रज्ञाश्री** ८१

बे स्तवनो — **सं. रसीला कडीआ** ८७

पांच हरियाळी — **सं. उपा. भुवनचन्द** ९४

वाचक पुण्यसागरकृत
अंजनासुन्दरी-पवनञ्जयरास (खण्ड ३) — **सं. प्रा. अनिला दलाल** ९८

श्रीचरमतीर्थपति दीक्षामहोत्सवाधिकार स्तवन
**-सं. मुनि शीलचन्द्र विजय**
**( डहेलावाळा )** ११९

विहंगावलोकन — **उपा. भुवनचन्द्र** १२६

श्रीपुण्यविजय-स्मृति-चन्द्रक प्रदान समारोह १२८

डॉ. भगवानदास पटेने
पुण्यविजयजी संशोधन-चंद्रक अर्पण **- हसु याज्ञिक** १२९

# वाचनाचार्य शीलशेखरगणिविरचिता:
# सिद्धहेमव्याकरणकतिपयोदाहरणमया: स्तवा: ।।

– सं. उपा. विमलकीर्तिविजय गणि

सिद्धहेम व्याकरणना अध्ययन-अध्यापननो प्रचार मध्यकाळना जैन संघमां खूब रह्यो हशे, तेम ते विषे लखायेली-रचायेली अनेक रचनाओ जोतां लागे छे. प्रस्तुत स्तवात्मक कृति पण ते व्याकरणनां उदाहरणोने केन्द्रमां राखीने ज रचाई छे, जे आ व्याकरणना अध्येताओ माटे अभ्यासोत्तेजक शम्बल पूरुं पाडे छे. आ कृतिमां ११ 'स्तव' छे. तेमां व्याकरणना १ थी ४ अध्यायना १६ पादोनां उदाहरणोने आवरी लेवामां आव्यां छे. आवी व्याकरणमय रचना, ते पण प्रभुनी स्तुतिरूप रचना बनाववी ए केटलुं कठिन काम छे ते विद्वानोने तरत समजाशे. काव्यशास्त्र अने व्याकरणशास्त्रमां ऊंडुं पाण्डित्य होय, उपरांत ते बन्नेने सांकळीने काव्यसर्जन करवा जेवी प्रतिभा पण होय, त्यारे ज आवुं सर्जन थई शके छे. आ स्तवनोना रचयिता आ प्रकारना प्रतिभावंत विद्वान हता तेनो ख्याल तो आ स्तवनो जोतां ज समजाई जाय तेम छे.

कर्तानो मुख्य आशय व्याकरणना प्रयोगोनो बोध करावावानो छे. काव्यमय भक्ति करतां जतां आवो बोध थई जाय तो अभ्यासीओने वधु सुगमता थाय तेवा कोई आशयथी आ रचना थई छे. जो के कर्ता रचनाना छेडे अभ्यासीओ समक्ष आकरी शरत मूके छे : "आ स्तवनो तेणे ज जोवा, जेने व्याकरणनां सूत्रो जीभना टेरवे रमतां होय, अने तेना अर्थोनो विशद बोध होय." अर्थात् नबळा विद्यार्थी माटे आ रचना नथी.

रचनामां कुल ११ स्तव छे. ४०२ श्लोकप्रमाण सम्पूर्ण रचना छे. १ थी ५ स्तव अनुक्रमे आदिनाथ, शान्तिनाथ, पार्श्वनाथ, नेमिनाथ, महावीर – ए पांच जिननी स्तवनारूप छे. ६-७-८ मां महावीरस्तुति, तथा ९-१०-११ मां सर्व(साधारण) जिनस्तवना छे.

आ रचनाना कर्ता वाचनाचार्य शीलशेखरगणि छे; तेओ श्रीदेवसुन्दरसूरि महाराजना शिष्य हता; तेमनो सत्तासमय १४मा शतकनो उत्तरार्ध छे. तेमणे अनेक स्तोत्रोनी रचना करी छे.

जयपुरस्थित महो. स्व. विनयसागरजीए अेमना अभ्यासकालमां कोईक

ह.प्र. परथी आ स्तोत्रोनी नकल उतारी राखेली, ते तेमणे (जेरोक्स नकल) मोकलेली, ते परथी आ सम्पादन यथामति कर्युं छे. क्षति रही होय तो शक्य छे. फूटनोटमां टिप्पनक तरीके मूल कर्ताए करेल टिप्पणो छे, तो बीजी नोटमां जे ते प्रयोगना सूत्रक्रमाङ्क सम्पादक द्वारा नोंधवामां आव्या छे.

*

## वाचकशीलशेखरगणिविरचिताः
## सिद्धहेमव्याकरणकतिपयोदाहरणमयाः स्तवाः ।

॥ श्रीआदिदेवस्तवः ॥

### ॥ प्रथमाऽध्यायस्य प्रथमः पादः ॥

**परमात्मन**माद्यं त-**मर्हं**कारस्थितं स्तुवे ।
**सिद्धिः स्याद्वादतो** येना-ऽसाधि **लोकान्त**संस्थिता ॥१॥

महाव्रतानि(५) तत्त्वानि(९) जीवस्थानानि(१४) च प्रभुः ।
**ह्रस्व**(५)-**दीर्घ**(९)-**स्वर**(१४)मिता - न्युपकृत्यै सदस्यवक् ॥२॥

आत्थ **सन्ध्यक्षराऽन्तस्था**, सङ्ख्या(२३) धर्मभिदः प्रभो! ।
**समान**(१०)-**नामि**(१२) मानाश्च, साधुधर्म(१०)-तपो (१२)-भिदः(२२) ॥३॥

भो! गुरु**र्व्यञ्जन**(३३)मिता-शातनाः प्रोज्झ्य सेव्यताम् ।
**वर्ग**(५)प्रमान् प्रमादांश्च, सदाऽप्यादिजिनोऽर्च्यताम् ॥४॥

देवान् **धुट्**(२४)सङ्ख्ययाधीशो-पसर्गान्(२०) **घोषवान्**(२०) मितान् ।
त्व**मघोष**(१३)प्रमाणानि, क्रिया**स्थानानि**(८) चोक्तवान् ॥५॥

चित्तं दिव्यति[1] नाऽऽप्तेषु[2], **भवदीय**वचस्सु नः ।
**ब्रह्मी**यति[3] **तमो**(१२)**भास्वन्, मरुत्वद्भि**र्नमस्कृताः ॥६॥

---

टिप्पनकम् : १. दिवमिच्छति = दिव्यति । 'अमाव्य०' (३।४।२३) क्यन्प्र० । २. प्राप्तेषु । ३. ब्रह्मणीवाऽऽचरति । 'आधाराच्चो०' (३।४।२४) क्यन्प्र० ।

श्लोकः : १. सूत्राङ्कः १।१।१-३ । २. सू० ४,५ । ३. सू० ६-८, १५ । ४. सू० १०, १२ । ५. सू० ११, १३, १४, १७ । ६. सू० २१-२३ ।

## ॥ प्रथमाऽध्यायस्य द्वितीयः पादः ॥

**जिनाधीशं गुणाधारं, मुदाऽहं करुणाकरम्** ।
**बहूर्जं** सुरभर्तृषि, सेव्यं **सिद्धीह्य**माश्रये ॥७॥

महत्त्रृद्धिसुरोपास्यं, वन्दिते(तै)क**जिनर्षभम्** ।
सज्ज्ञानादित्रिरूपः स्याद्, **यवल्कार** ऋता सह ॥८॥

तथेश --- रूपो, जायते देशनां सृजन् ।
ऋकारो हि ऋकारेण नृ(लृ)कारेण समं यथा ॥९॥ [क]

मोहेन **परमर्त्तं** मां, पापं **प्रार्ण्णं**[1] **ऋणार्ण्ण**[2]वत् ।
**दोषार्त्तं** पीडयेद् वीक्ष्य, त्वां तु **प्रार्च्छाम्य**हं सुखम् ॥ [ख]

**प्राल्कारन्ति** भवन्नत्या, क्षमया **प्रार्षयन्ति** ये ।
**गुणौघैर्धौत**चित्तास्ते, सदैवोद्धत्यवर्जिताः ॥१०॥

योऽपुष्यत् **प्रैष्यतां**[3] **प्रौढ!**, **प्रौह प्रौढौ**[4] त्वयि प्रभो ! ।
**स्वैरि**मोहनृप**स्वैरा-ऽक्षौहिणी**भयमस्यज ! ॥११॥

**विद्रुमोष्ठा** अवृद्धौ तु, क्रूरामर्त्या **इहेव** ते ।
ये दध्युस्त्वां मुदो रूपं, **प्रेलिता**[5]**ः प्रोखितुं**[6] शिवम् ॥१२॥

त्वं भूत्या प्रैधसे चार्वा, दुःखे च **प्रोषधीयसे** ।
**भात्र**[7]**ङ्गं मञ्जु आपन्नः**, शिव एवोत्क ! **नायक** ! ॥१३॥

**नाव्यसेऽत्र भवाम्भोधा-वार्जवे जवनो**[8]**ऽनिशम्** ।
भव्यैश्च **नन्त्र्य**[9]विस्तीर्ण-**स्तवौयत** यशः पयः ॥१४॥

---

टिप्पनकम् : १. प्रकृष्टं ऋणं = प्रार्णम् । २. ऋणस्य ऋणं = ऋणार्णम् । ३. दासताम् । ४. प्रकृष्टो हस्य प्रौढिर्यस्य । ५. 'इलण् प्रेरणे' । ६. 'उख गतौ' । ७. भातीति भाता । 'णक-तृचौ' (५।१।४८) तृच्प्र० । ८. जवनस्त्वरितः । ९. नन्तृषु साधुर्नन्त्र्यः । 'तत्र साधौ' (७।१।१५) यप्र० ।

श्लोकः : ७. सू० १।२।१ । ८. सू० ६ । ९. [ख] सू. ७-९ । १०. सू० १०-१३ । ११. सू० १४, १५ । १२. सू० १६, १७, १९ । १३. सू० १९-२३ । १४. सू० २४-२७ ।

त्वां **गवाक्ष**विमानेषूः, नीहा नेमु**र्गवीश्वराः** ।
**गवेन्द्राश्च गवाभीष्ट**[1] !, **गोअग्र्य**[2] इह **गोऽवन** ! ॥१५॥

**प्रीणाते** आशु रोदस्यौ, **मृदू अंह्री इमे** इन ! ।
तव तौ नाऽनमन्नेत्य, कुधियो**ऽमी अहो** इह ॥१६॥

**प्रभो** ! इत्या इमे भेजुः, **किम्वजं किमु** ईश्वरम् ।
त्वामपास्य परे[3]ऽस्यन्तं, यशोवाग्भ्यां **दधि मधुम्** ॥१७॥

## ॥ प्रथमाऽध्यायस्य तृतीयः पादः ॥

भक्तियु**ङ् ङ्वते**[4] यस्ते, गुणान् सन्नपसद्म तान्[5] ।
शश्वच्च वक्रवाग्युक्तः, स **षण्णां** रक्षकोऽङ्गिनाम् ॥१८॥

**रुग्घीन**द्विदृतौ दक्ष !, विष्वग्हित ! विपद्धर[6] ! ।
**वाक्छान्त** ! **सच्छमश्छान्तः**, पुण्यैः खलु गुणैः प्रभो ! ॥१९॥

**महश्शस्तः सहस्सार-ष्षट्** द्रव्यप्रचनश्चितम्[7] ।
**विरतश्छद्मतस्तन्या-ष्टङ्कस्त्वं** मे स्मराऽश्मनि ॥२०॥

**स्वामिंश्चन्द्रसमांश्चारु- गुणांश्छिन्नमितींस्ततान्** ।
शंसेत् **पुमांष्टण**त्कार-करान् विश्वे **प्रशान्** तव ॥२१॥

**पुंस्कान्तको** न **पुंस्प्रष्ठो**[8]**-ऽपुंस्चलोऽपुंश्चलो** भवेत् ।
त्वां **पुंख्यातो**ऽत्र **पुंशूरः, पुंष्ठकः पुंस्तमो**[9] नमन् ॥२२॥

त्वं **नॄन् प्रीणासि नॄः पासि**, यथा संस्कारयुग् वचाः ।
**सस्कर्त्ता** भूतलं नेत-र्वच्मि **कांस्कान्** परांस्तथा[10] ॥२३॥

---

टि० : १. गोरभीष्टो गवाभीष्टः । २. गवि अग्र्यो गोअग्र्यः । ३. परतीर्थिकाः । ४. ङुंङ् शब्दे । ५. जगत्प्रसिद्धान् । ६. विपद् हरतीति । ७. ज्ञानम् । ८. 'प्रष्ठोऽग्रगे' (२।३।३२) षत्वम् । ९. प्रकृष्टः पुमान् । ३. अन्यतीर्थिकान् ।

श्लो० : १५. सू० २८-३१ । १६. सू० ३४, ३५ । १७. सू० ३४, ३७, ४१ । १८. सू० १।३।१, २ । १९. सू० ३, ४, ६ । २०. सू० ६, ७ । २१. सू० ८, ९ । २२. सू० ९ । २३. सू० १०, ११, १३ ।

भुवि **चङ्क्रम्यते** नाऽयं, सुखं **जञ्जन्यते**ऽस्य च ।
यस्त्वां **वव्वँन्यते कंव्वं[१], यम्यम्येत[२]** प्रमोदतः ॥२४॥

सोऽ**वश्यँल्ह्लादते खेदं,** ह्नुतेऽलं **ह्यार्जवमम्ह्यलेत्** ।
**सम्राड्** भवेन्मुदा त्वां यो, युङ्क्ष्व सदा **श्रुतंगुण्ट्[३]** श्रयेत् ॥२५॥

**द्विड् त्समूहं हरन् त्साधु[४], वहञ्ज् शान्ति जिनोऽर्च्यताम्** ।
**धर्मो जेता भगो दैत्या, भो देवा भुव्यघो नराः** ॥२६॥

**त्वत्पादा** अर्वति **स्वच्छा-वभीत** इह मार्दयः[५] ।
**तस्रोद्रतार्त्तयिद्धांश - वातन्याविभ** इष्टशम् ॥२७॥

**भो उत्तमायघोयिन्द्रा - येषयेव** मद्धानिनः ।
संविदा[६]युदुऽघं **भिन्द-न्नमृताध्वसुभण्णि[७]ह** ॥२८॥

त्वां नत्वा **सत्तनूच्छायं,** प्रभो ! छद्मोज्झितं नरः ।
कर्म किं **माच्छिदद् ब्रह्म्म,** गच्छेदर्हगुणह्रदः ॥२९॥

सद्ध्यानगो **३ प्प्रिय** ! श्रीमन्न्, **प्रोर्ण्णुनाव** गुणैर्भवान् ।
दिशो वर्य ! सुधाजल्प्य, ह्यशं **क्कलितः प्प्रभो !** ॥३०॥

पुंसां निष्कम्प ! **रुक्श्शान्त !, दर्शनेश ! वचांसि** ते ।
**बृंहयन्ति** मुदं स्वाराड्, वन्द्याऽर्चीरानिविग्रह ! ॥३१॥

येन **माढिः[९]** कृता ते वाग्, **लीढा[१०] गूढं** निजं[११] मनः ।
**सोढुं** कष्टं च **कायोत्थं, वोढा सैष[१२]** शिवश्रियम् ॥३२॥

---

टि० : १. कं सौख्यं यस्यास्तीति कंव्वं । 'कं-शंभ्यां०' (७।२।१८) मत्वर्थे वप्र० । २. उपरमेत । ३. 'गुणण् आमन्त्रणे । श्रुतं गुणयतीति । ४. क्रियाविशेषणम् । ५. मार्दवं करोतीति मार्दवयति । णिच्प्र० । मार्दवयतीति क्विप् । ६. ज्ञानेन । ७. सुष्ठु भणतीति । ८. 'बृंह वृद्धौ' । ९. मद्धर्म ! (?) माढिः पूजा । १०. स्वादिताः । ११. संवरितं । १२. 'तदः सेः स्वरे पादार्था' (१।३।४५) सेर्लुक् ।

श्लो० : २४. सू० १४, १५ । २५. सू० १५-१७ । २६. सू० १८-२२ । २७. सू० २४, २६ । २८. सू० २४, २७ । २९. सू० २८, ३०, ३१ । ३०. सू० ३१, ३२, ३५ । ३१. सू० ३६, ३७, ४० । ३२. सू० ४२-४५ ।

स त्वं **पिण्ढ** भयं मेऽर्त्तिं, **पिण्ड्ढि**[1] **तर्प्ता**[2] सतां गुणैः ।
**सक्वो** येन जितो मोहो-**ऽनेषो** भूभाग आरचि ॥३३॥

नयज्ञति भवे **बुद्ध**-तत्त्वो **विट्**[3] त्वयि **भक्तिभाक्** ।
देव **उत्तमधीः प्राज्ञः**, [4]**सहः ख्यातः** तपः क्षमः ॥३४॥

**गीःपतिको यश स्फीतं, गीर्षु** धूतपयःसु ते ।
**गीर्पतिः** स्तुत्य ! तेजोऽस्ता-**ऽहर्पते** ! निनता**ऽप्सरः** ! ॥३५॥

ऊनस्तवाऽन्तिकस्थोऽन्य-स्वभावोऽपि सदृग् भवेत् ।
योगे यथा तवर्गो हि, स्याच्चवर्गटवर्गयोः ॥३६॥

लोके मूर्द्धन्यता टव-ठव-डव-ढवस्य वत् ।
**त्वच् शासनस्य पिष्टा**ऽघ-तमः **पूष्णोऽभवज्जिन** ! ॥३७॥

जज्ञे यस्त्वत् **पुमाञ् शान्त**-श्चवर्गाक्षरवत्समम् ।
कुर्युः स्वेहि तवर्गं त-दक्षाण्येकत्र संस्थितेः ॥३८॥

यस्त्वामीट्टे तमस्तस्य, **वृश्चाऽप्रश्ने**ऽपि सत्पथम् ।
बम्भण्मि स्म च षट्तर्का-गमा षट् स त्वरुण् ननु ॥३९॥

**षण्णां** विशेषं हृदि दर्शनानां, मत्वा जवात् **षण्णवतिं** च हित्वा ।
पाखण्डिनां त्वामिति नौति यस्तं, शिवं **भवांल्ल**भयताज्जिनाय ॥४०॥

*इति हैमव्याकरणकतिपयोदाहरणमयः श्रीआदिदेवस्तवः ।*

---

टि० : १. 'पिप्लृंप् संचूर्णने । २. 'तृपौच् प्रीतौ' । ३. विट् पुरुषः । ४. सह-बलेन रम.. ।

श्लो० : ३३. सू० ४६, ४८ । ३४. सू० ४९, ५१, ५३, ५४ । ३५. सू० ५५-५९ । ३७. सू० ६० । ३८. सू० ६० । ३९. सू० ६०-६२ । ४०. सू० ६३, ६५ ।

## ॥ श्रीशान्तिनाथस्तवः ॥

॥ प्रथमाऽध्यायस्य चतुर्थः पादः ॥

शान्ति **शिवाय** सर्वज्ञं, **मुद्यत्नाभ्यां जनाः** स्तुत ।
**अमीभिरिमकैर्देवैः**[1][2], सदाऽतिजरसैर्नतम् ॥१॥

को न **वाक्काययोः** शुद्ध्या, **गुणेभ्यः**[3] स्पृहयेत्तव ।
**शमेन जितरोषस्य**, केषां **वाक्येषु** नादरः ॥२॥

**यस्मै हिताय सर्वस्मै**, शक्राः **सर्वे** नता रयात् ।
नेशु**र्यस्माच्च** लोके**ऽस्मिन्**, दोषास्त**स्मान्**मुदस्तु मे ॥३॥

नतिर्गुणत्वतं[4] हेतुं, **त्वादृशे** क्रियते यदि ।
**कतमस्मै** तदा **त्वस्मै**[5], **कतरस्मिंश्च** विस्मयः ॥४॥

युष्मादृशे नमस्कार्ये-**ऽन्यतरस्मि**न्नतिर्मुधा ।
**स्वस्मिन्** निःस्वे हि कः स्वाये-**तरस्मि**न्नादरं सृजेत् ॥५॥

भावारयो रता **नेमा**, जिता **नेमे**ऽर्जिता गुणाः ।
त्वयाऽ**नल्पे** सुरास्तुष्टा, नेमुश्च त्वां चतुष्टये[6] ॥६॥

**स्वाऽन्ये** दानात् त्वया **स्वाऽन्या**, गिरा च प्रीणिताः प्रभो ! ।
जने **पूर्वाऽवरे**ऽचिन्ति, **मासपूर्वे** यथाहितम् ॥७॥

स्वे **पूर्वस्मिन्** भवे तप्तं, यैस्तेषां त्वं हि गोचरः ।
भुवनेऽत्र **द्वितीयस्मि-स्तृतीये** विश्रुतो गुणैः ॥८॥

**पूर्वे** जिना नृपा आस-न्नसमाः केऽपि **वाऽपराः** ।
राज्यलाभेऽप्यरज्यन्त, समस्मिन्न भवादृशाः ॥९॥

---

टि० : १. अल्पा इमा इमकास्तैर्व्यन्तरादिभिः । २. महर्द्धिकैरिन्द्रादिभिः । ३. 'स्पृहेर्व्याप्यं वा' (२।२।२६) चतुर्थी । ४. गुणसमूहहेतुम् । ५. अन्यस्मै । ६. चत्वारोऽपि भवनपत्यादयः ।

श्लो० : १. सू० १।४।१ -३ । २. सू० ४, ५ । ३. सू० ६-८ । ४. सू० ७-९ । ५. सू० ८ । ६. सू० १० । ७. सू० ११-१३ । ८. सू० १४, १६ । ९. सू० १६ ।

**प्रजायै** हित**सर्वस्यै**, **रमाया** भाजनं भवान् ।
**सर्वस्या** देव ! **सर्वस्यां**, **कृपायामस्ति** यत्नवान् ॥१०॥

**साधवो** दधतः क्षान्ति-कूपे अस्ताधयस्तव ।
अङ्घ्रीपद्ममृदू दध्युः, **श्रद्धया क्षमयोः**[1] प्रिय ! ॥११॥

यो **विश्वबन्धवे तेऽति-स्त्रये**ऽनंसीन्न तस्य भीः ।
**पटोः** स्फुटमतेर्दीप्त्या, **रविणा मञ्जुना** सम ! ॥१२॥

त्वयि त्रिजगतः **पत्यौ**, प्राप्ते **सख्यौ गुरौ** च किम् ।
**सख्याऽ**न्येन **क्षितौ पत्या**, व्रते **सख्युर**काङ्क्षक ! ॥१३॥

**बुद्ध्यै** योऽश्लाघत तान् वै, तवा**ऽतन्वां नतौ** रतः ।
**चार्वाः** स **गुरुबुद्धेः** स्या-ज्जेता **बुद्ध्याः शुचेर्गुरोः** ॥१४॥

**रत्नस्त्रियै** यथा **पङ्ग्वै**, **मह्यामस्पृहयालुना** ।
**सिद्धिवध्वां** त्वयाऽसञ्जि, **शुच्यास्तन्या** जितार्जन ! (?) ॥१५॥

**शिवश्रियै श्रियास्त्यागं**, **स्वःश्रिये स्वर्श्रियो**ऽङ्गिवत् ।
व्यधा विज्ञो हि रज्येन्न, **श्रियां** भुवि च **सुभ्रुवाः** ॥१६॥

अक्षोभ्यः **सुभ्रुवां भीनां**, भेत्ताऽग्र्याणां **श्रियां** गृहम् ।
**सुराणां तद्वधूनां** च, वन्द्यः **षण्णां** हितोऽङ्गिनाम् ॥१७॥

**चतुर्णां** पद**धर्माणां**, **पञ्चानां** स्त्रोतसां[2] जयी ।
**त्रयाणां** जगता त्राता, **गोः** प्रियोऽसि मतेर्वरः ॥१८॥ युग्मम् ॥

---

टि० : १. क्षमा च क्षान्तिः, क्षमा च पृथ्वीक्षमे । समानानामेकशेषः तयोः । २. इन्द्रियाणाम् ।

श्लो० : १०. सू० १७, १८ । ११. सू० १९, २१, २२ । १२. सू० २३, २४ । १३. सू० २५-२७, ३६ । १४. सू० २३, २५, २८ । १५. सू० २४, २८, २९, ३० । १६. सू० ३०, ३१ । १७. सू० ३१-३३ । १८. सू० ३२-३५ ।

**पत्युः शिवश्रियः**[१] **पत्यु-र्नेतुर्जातं** नुतागमम् ।
**पितरं** नु **प्रशास्तारं, भेत्तारं** रति**भर्त्तरि** ॥१९॥

सत्रातरचिरा**मातः** !, **शान्ते** ! रक्ष **गुणक्षमे** ! ।
शमाम्बु न हि **विश्वाम्ब** !, मां श्रीगेहजिते[२] ! **जिन** ! ॥२०॥

**त्वयोर्वी रक्षिता** राज्ये, शक्तीनां[३] **तिसृणां पदम्** ।
भवान् **षण्णां** गुणानां[४] चा-ऽजनि सप्रेयसी भृशम् ॥२१॥

**चतुर्ण्णां कायुपायानां**, जेता **चतसृणां** दिशाम् ।
अपनेताऽरि**नॄणां** च, **नृणामृद्धी**र्ददन् महान् ॥२२॥

सा या हन्याऽऽगमाधीति-र्व्यह्नि वर्या महात्मनाम् ।
त्वया न्यषेधि पथ्याय, नम्रोऽस्मि त्वयि **मुन्नियाम्**[५] ॥२३॥

सोऽ**ष्टासु** दिक्षु विख्यात-स्त्वं जया**ऽष्टौ** हरन् **मदान्** ।
**अष्टानां** कर्मणां भेत्ता, येना**ऽष्टौ** मातरः स्मृताः ॥२४॥

त्वया रक्ष्यन्ते षड्जीवा, विषयाः **पञ्च** दूरिताः ।
गुणा **यति** यथात्ताश्च, तथाऽन्ये **तति कत्यधुः**[६] ॥२५॥

शैत्यमाधुर्यव(च)**र्याणि, पयसी द्वे वचांसि** ते ।
विजिग्यिरे जिनाऽमूनि, मुनिवृन्दं साध्वपा(सा)त् ॥२६॥

**अन्यत्तेऽन्यतरद्** दूरे-**ऽजर एकतरं** वचः ।
**ददेऽतिजरसं** स्थानं, बहु**वारे** ! भवानले ॥२७॥

---

टि० : १. गमं शिवश्रियः पत्युस्तीर्थङ्करान् जातं कृतं, कथम्भूतान् नेतुः परिवृढस्य पत्युः स्वामिनः । २. जित इः-कामो येन स जिते, तस्य सम्बोधनम् । ३. प्रभुत्वोत्साहमन्त्रजास्तिस्रः शक्तयः । ४. सन्धिविग्रहयानासनद्वैधाश्रयाः षड्गुणाः । ५. मुदि नयतीति क्विप् । ६. तति गुणा अन्ये कति अधुः ।

श्लो० : १९. सू० ३०, ३६-३९ । २०. सू० ४०-४४ । २१. सू० ४५-४७ । २२. सू० ४७, ४८ । २३. सू० ५०, ५१ । २४. सू० ३३, ४९, ५२, ५३ । २५. सू० ५४ । २६. सू० ५५, ५६ । २७. सू० ५८-६१ ।

**अक्ष्णोः** श्रिया जिताम्भोज !, बहु नो यशसः **शुचेः** ।
**दध्नः** क्षीराब्धिवीराणां, समा द्विश्वान्यपूरयः ॥२८॥

वचांस्यमृतसध्र्यञ्चि, साधुषु **प्राङ्**[१] **वदन् भवान्** ।
**बहूर्ञ्ज** मोहमङ्गे **युङ्** बुद्ध्या **श्रीयुग्** मुदं व्यधात् ॥२९॥

गत्याऽ**नड्वान्** जय त्वं स, **गौद्यौर्येन** कृता महैः ।
**गा** यस्याऽनुपमाः पीत्वा, **पुमान् द्यामपि** नैहत ॥३०॥

शैवोऽदर्शि त्वया **पन्था**, धर्मोऽभाषि भवाम्बुधौ ।
**मन्थास्त्वां** साधवः **पथ्य**[२], **ऋभुक्षाणश्च** भेजिरे ॥३१॥

**ऋभुक्षाऽ**र्च्य पदाब्जे ते, गीश्च दर्शितसत्**पथी** ।
न्यस्यतां **पथि** मुक्तेर्मां, शस्यबुद्ध्या **जितोशनन्** ! ॥३२॥

भेजुर्धर्मधुराऽ**नड्वं-श्चत्वारस्त्वां** **नतोशन** ! ।
**अतिचत्वः** ! कषायैर्गोः, **सखायं** सुरसञ्चयाः ॥३३॥

सोऽ**नेहा**ऽऽसीत्[३] परो नम्र-**पुरुदंशानयोशना** ।
यत्र **राजा पिते**वाऽभूः, **प्रियकर्त्ता सखेव** च ॥३४॥

तस्य **भद्राणि भूयांसि**, **हारीणि** स्युर्गुणै**र्महान्** ।
**तमोहा** येन **पूषे**व, त्वं यशस्वी नतः शमी ॥३५॥

नत**वृत्रहणौ** तेऽही, श्रितौ पङ्कजराजितौ ।
येन तेजो**ऽर्यमा** कुर्या-स्त्वं **तमाप** इवाऽमलम् ॥३६॥

देव ! **स्वाम्पि** सरांसीव, तृष्णां त्वां **हतवा**निह ।
देहिनां **सन्महाः श्रीमान्**, नीरजः सर्वदोषजः[४] ॥३७॥

---

टि० : १. प्रथमः । २. पन्थानमिच्छवः । ३. सोऽनेहाकालः प्रकृष्ट आसीत् । ४. 'जसूच् मोक्षणे' - सर्वदोषान् जस्यतीति क्विप् ।

श्लो० : २८. सू० ६२, ६३ । २९. सू० ६६, ६७, ६९-७१ । ३०. सू० ७२-७५ । ३१. सू० ७६-७९ । ३२. सू० ७६-८० । ३३. सू० ८०-८३ । ३४. सू० ८०, ८४, ८५ । ३५. सू० ८५, ८६, ८७ । ३६. सू० ८७, ८८ । ३७. सू० ८९, ९० ।

हेलया त्वं हरन्मोहं, **क्रोष्टारमिव** केसरी ।
दुष्ट**क्रोष्टूनि तन्वम्पि**[१], वनानाप्य तपोव्यधाः ॥३८॥

स्थीयते यत्र निःशङ्कं, हरेः **क्रोष्टो**रिवान्तिके ।
**क्रोष्टा क्रोष्ट्र्या** च सा कस्य, देशनोर्वी मुदे न ते ॥३९॥

त्यक्त्वा कलत्राणि वराणि देव-
दाराणि वाऽऽदत्त चतुर्यमीं यः ।
तं स्तौति यः शान्तिजिनं सुशब्द-
ब्रह्माश्रितं[२] तादृगिहापि स स्यात् ॥४०॥

*इति हैमव्याकरणकतिपयोदाहरणमयः श्रीशान्तिनाथस्तवो द्वितीयः ॥छ॥*

•

## ॥ श्रीनेमिनाथस्तवः ॥

॥ द्वितीयाऽध्यायस्य प्रथमः पादः ॥

यं श्रिता गुप्तय**स्तिस्रः**, श्रीनेमिं नौमि तं गतीः ।
**चतस्रो**ऽपासितुं ज्ञाना-दिश्रियां **तिसृणां** गृहम् ॥१॥
**राभिरद्भिरि**वाब्देन, तोषितं **जरसो**ज्झिता ।
जगद् **युष्माभिरस्माभि**-स्तदर्थ्येताऽजरः पदम् ॥२॥
शङ्खे यत्पूरिते विष्णु-र्बलमाह **मया त्वया** ।
अजय्यस्**त्वयि मय्ये**ष, हितो भावी सखा**ऽऽवयोः** ॥३॥
कषायाधीर्न युष्माकं, रागद्वेषौ **युवां** जडौ ।
याता**ऽस्मभ्यं युषभ्यं**[३] य-द्वितो जेताऽस्ति वः प्रभुः ॥४॥

---

टि० : १. तन्व आपो येषु तानि तन्वम्पि । २. शुद्धज्ञानाश्रितम् । ३. पलायध्वं, यत् यस्मात् अस्मभ्यं जितः प्रभुः, वो युष्माकं च जेताऽस्ति । किंविशिष्टे-भ्योऽस्मभ्यं युष्मानाचक्ष्महे णिजि युष्मयामः । युष्मयाम इति क्विपि यूयं तेभ्यो युषभ्यम् ।

श्लो० : ३८. सू० ८९, ९१ । ३९. सू० ९१-९३ ।
१. सू० २।१।१, २ । २. सू० ३-६ । ३. सू० ७ । ४. सू० ८-१० । ५. सू० ११-१३ । ६. सू० १४-१७ ।

**त्वां** तद्वचोऽ**हकं** तीर्थं, **त्वदीयं** नौमि रक्ष माम् ।
**त्वं** मद्दु:खं हर प्रीत्या, **वयं यूयं** यदीक्षिताः ॥५॥

**मह्यं** हित ! नमस्**तुभ्यं**, **तव** सेवा सदा **मम** ।
कामक्रोधौ **युवां मां** चो-ज्झत**मस्मानवे**त्प्रभुः ॥६॥

**अस्मभ्यं** नत **युष्मभ्य**-मिष्टं देह्य**स्मदा**पदम् ।
दूरय त्वं मुद**स्माकं**, स्तुत्या **युष्मा**[१]**कमस्तु** च ॥७॥

हितो **वो नो** जनाः सोऽव्या-दीशो वीक्ष्य यमूचतुः ।
दम्भलोभौ मदक्रोधौ, क्रुद्धो **वां नौ** निहन्त्यसौ ॥८॥

मुदे हितं मतं **ते मे**, नौमि **त्वा** रक्षया भवान् ।
ऊना युष्मान् जिनः पातु, सन्तो **मा** वोऽस्तु स प्रभुः ॥९॥

नेमेऽर्हंस्**ते** नमः स्वाम्यं, **तव त्वां** च न कोऽर्चति ।
समीक्ष्य **त्वां** जनोऽभ्येति, भाग्यात् **त्वां** पश्यतीह सः ॥१०॥

धन्योऽहं पासि यन्मा त्वं, जिनस्तत्त्वाऽभजन् सुराः ।
जना यूयं विनीतास्तत्, प्रभु**र्वो** भवतोऽवति ॥११॥

**पश्यैतकं** नतं लोक-मथो **रक्षैनमी**शते ।
**मुख्येनैतेन** जिग्येऽब्ज-**मेनेने**न्दुः सदा श्रिया ॥१२॥

पदोरस्त्य**नयोः** श्रीस्ते, जनो दृष्ट्वा(ट्वा) **तदेनयोः** ।
**प्रज्ञेमि(म)केषु** वाक्येषु, **तदेष्वे**षां सतां रतिः ॥१३॥

**अयं** मोह **इयं** माया, वचसाऽपास्य**नेन** ते ।
रागद्वेषौ हतौ **चेमौ**, **को**ऽस्मिन्नाऽतः **कदा** रतः ॥१४॥

---

टि० : १. स्तुत्या युष्मान् चक्ष्महे णिज् क्विप् ।

श्लो० : ७. सू० १८-२० । ८. सू० २१, २२ । ९. सू० २३, २४ । १०. सू० २३,२४ । ११. सू० ३१ । १२. सू० ३१, ३३ । १३. सू० ३३-३६ । १४. सू० ३७-४० ।

गते यतोऽप्युंभे[१] ध्याने, **द्वे** येनाऽसि स्मरो**ऽसुकः** ।
लोभो**ऽसुकौ** मुदे **सैष**, देवः **स्याऽसौ** च तस्य गीः ॥१५॥

जज्ञेऽस्याऽदोमवन्नाद्रौ,[२] विकल्पोऽ**मुमुयङ्** न कः ।
**अमुना** भीहता दोषा, ज्ञा अमुष्या**मुके**ऽस्मरन् ॥१६॥

ये तेऽ[प्य]ध्यैत सिद्धान्तं, **लुवं** प्रीते**र्नियं** पथि ।
**युयुवुः** स्वं **दिवीयु**स्ते, शिवं **नायक** ! **शिश्रियुः** ॥१७॥

राजीमती **स्त्रियां** वाञ्छन्,[३] त्वां स्तुव**न्नश्नुवीत** ना ।
**गोस्त्रियः सुभ्रुवः स्त्रीश्च**, मुक्ति**स्त्री**मपि तां क्रमात् ॥१८॥

ये **निन्युः सुधियो वस्वः**,[४] पत्यस्त्वां **चिच्युरा**र्जवम् ।
**दोषल्वो**ऽग्राथ एषां स्यु-र्गुणाः **प्रतिभुवः** श्रियः ॥१९॥

**कारभ्व**मिव **वर्षाभ्व**-मिव चार्त्तं भवेऽत्र माम् ।
पान्तु वाक्यानि तेऽग्र्याणि, तमः**पूष्णो विपज्जिहीः**[५] ॥२०॥

भग्नरुग् दोषलून्युंस्ते,[६] **वृक्णा**त्तेऽघं **पिपिक्षतः** ।
मते को मोक्षमारोक्ष्मन्, **भवोत्तीर्ण** ! न **दीव्यति** ॥२१॥

---

टि० : १. आर्त्तरौद्रलक्षणे । २. अदसो मः = अदोमः । अद्रौ अद्रिप्रत्यये यथा विकल्पभाग् भवति तथाऽस्य न । अमुमञ्चतीति । २. विगता इच्छा यस्य । ३. वसु इच्छन्ति, क्यन् । वसूयतीति क्विप् । एवम्-पत्यः । ४. क(ह)र्त्तुमिच्छति जिहीर्षति, सन् । 'स्वर-हन-गम०' (४।१।१०४) दीर्घः । 'ऋतां क्ङितीर्' (४।४।११६) इर् । विपदं जिहीर्षतीति विपज्जिहीः, क्विप्। 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदान्ते' (२।१।६४) दीर्घः । ५. लवनं = लूनिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० । दोषाणां लूनिर्यस्मात् स, तस्य ।

श्लो० : १५. सू० ४१-४४ । १६. सू० ४६-४९ । १७. सू० ५०-५२ । १८. सू० ५३-५५ । १९. सू० ५६-५९ । २०. सू० ५९-६० । २१. सू० ६१-६३ ।

स नो **दिव्यति**[1] **गीर्येन्न**[2], गुरोः **कुर्यात्** तपोरजः ।
**छुर्यात्ते** समता **धुर्या**, **गीर्येनाऽघलुवः** श्रुता ॥२२॥

**जगन्वान्** सिद्धिमतिर्ध्वन्, नेमिवद्भिः[3] सदा **प्रशान्** ।
श्रेयोरथेऽनडुद्भिस्त्वं, श्रितो **विद्वद्भिरुक्तदिक्**[4] ॥२३॥

**सुदृगुष्णिक्** स्तुतो[5] **धीस्पृक्**, **स्रग्भिस्त्वं** पूजितोऽमरैः ।
**अजीवनक्** नरेषु **प्राङ्** **श्रीसजूर्युङ्** गुणैर्दधृग् ॥२४॥

किं **तैरहोभिरर्हन्न**, यत्राहर्निशमानतः ।
**अहोरात्रं** मनोवाग् **घुट्**[6], **तत्त्वभुन्नतकामधुक्** ॥२५॥

भव्या यूयं न्यगूढं हृत्, सद्गिरोऽ**धुगध्वमा**श्रिताः ।
जिन ! सम्यग् **निघोक्ष्यध्वे**, योगान्[7] **भोत्स्यध्व** आश्रवान् ॥२६॥

बुधास्तत्त्व**मबु(भु)द्ध्वं** चे-न्नाघं धच्छाशये शमम् ।
**धद्ध्वे** रुन्ध च दुर्बुद्धिं, साम्यं **धत्तः** सदा तदा ॥२७॥

विश्वं यशोभि**रस्तीढ्वं-मवृढवं** मुक्तिमुन्नतिम् ।
**ववृढ्वे** शर्म चेषीढ्वं, स्तीर्षीढ्वं दुःखमीश ! मे ॥२८॥

**अग्रहीढ्वं श्रियायिढ्वं**, श्रेयोऽ**ग्राहिढ्वमु**त्सवैः ।
**जगृहिढ्वे शमासिध्वं**, सिद्धौ **मेहिध्वमु**त्तमैः ॥२९॥

**अलविढ्वं** तमोबाढं, **पुपुविढ्वे** स्वमुच्चकैः ।
**त्रातुमुत्सहिषीढ्वमा-यिषीढ्वं** हृदि मे प्रभो ! ॥३०॥

---

टि० : १. दिवमिच्छति = दिव्यति । 'अमाव्ययात्' (३।४।२३) क्यन्प्र० । २. गिरिमिच्छेत् = गीर्येत् न । ३. 'णमं प्रह्वत्वे' नेमुर्नेमिवांसः । 'तत्र क्वसु का०' (५।२।२) क्वसुप्र० । 'अनादेशादे०' (४।१।२४) ने०, तैः । ४. उक्तो दिग्मार्गो येन । ५. सुदृग्भिः सम्यग्दृष्टिभिरुष्णिग्भिः छन्दोभिः स्तुतः सुदृ० । प्रगल्भः । ६. 'गुहौग् संवरणे' । ७. मनोवाक्कायान् ।

श्लो० : २२. सू० ६३-६६ । २३. सू० ६७-६९ । २४. सू० ६९-७३ । २५. सू० ७४-७७ । २६. सू० ७७ । २७. सू० ७८ । २८. सू० ८० । २९. सू० ८१ । ३०. सू० ८१ ।

अनायिढ्वं मनोयेना-ऽस्मारिषीढ्वं स मोहधक् ।
लेढि ते वाक्सुधां दग्ध-तापां हस्तजिताम्बुरुट् ॥३१॥

अद्रोग्धा स्नुग्धशं[1] स्नेढा,[2] स्नूढ[3]सत्येष्वमूढधीः ।
अमुग्धस्निग्धहृद् दैत्य-ध्रुग् रुक्मिध्रुड् नतो जय ॥३२॥

सत्यवाग् भक्तिभाग्भिस्त्वं, मुक्तोपानद्भिरानतः ।
निर्ग्रन्थैरिष्टसिद्धान्तै-स्तीर्थस्त्रष्टाच्छसत्पथम् ॥३३॥

नम्रसम्राट् तमोमार्ष्टा, श्रीविभ्राट् गुणराष्टिसृट् ।
लाभव्रष्टा विभो ! नन्द, यशोभ्राष्टिकृदर्तिमृट् ॥३४॥

पापभृट् तापवृट् कर्म-भ्रष्टा पुम्भिर्नतो भवान् ।
दिष्टविट् सुख आव्रष्टा, पृष्टोऽपि श्रेय आधितट् ॥३५॥

स्वामिन् ! मुक्तिचिकीर्मोह-सूर्कृतमोहः सुधीरिमा ।
शंवान् ! श्रीधाम ! धीसद्मन् !, दयावान् शमवानव ॥३६॥

मुग्धान् भास्वान् यशस्वांश्च, प्रजां राजन्वतीं सृजन् ।
लक्ष्मीवांस्त्वां हरिर्भेजे, कक्षीवान्[5] नु मुनीवतीम् ॥३७॥

गुणोदन्वान् नताऽष्ठीवान्,[6] मुन्योघो यवमत्करम् ।
वीक्ष्य त्वां मोहनिश्यर्कं, हृष्टः सिंहासनि स्थितम् ॥३८॥

दतां पदोर्नसो दोष्णो-र्हृदोऽस्नश्चोपमा न ते ।
सुधायूष्णा समा गीः स्या-दुदनस्तुल्या तमोऽनले ॥३९॥

---

टि० : १. स्नुग्धमुक्तं शं येन सः । २. स्नेहवान् । ३. स्नूढ उक्तसत्येषु । ४. अमुग्धं स्निग्धं हृत् यस्य स चासौ दैत्यधुग् वासुदेवश्च रुक्मिध्रुड् वनदेवश्च ताभ्यां नतः । ५. नु यथा कक्षीवान् ऋषिर्मुनीवतीं नदीं भजति । ६. अस्थीनि सन्त्येषां तेऽस्थीवन्तः, नता अष्ठीवन्तो यस्य मुन्योघस्य ।

श्लो० : ३१. सू० ८१-८३ । ३२. सू० ८३, ८४ । ३३. सू० ८५-८७ । ३४. सू० ८७ । ३५. सू० ८७-८९ । ३६. सू० ९०-९४ । ३७. सू० ९४-९६, ९८ । ३८. सू० ९७, ९७, १०० । ३९. सू० १०१ ।

**द्विपाद**स्त्वां यथा नेमु-स्तथा वन्द्यं चतुष्पदाम् ।
त्वं बोधय**न्नुदीच्या**दीन्, **प्राच्या**दिप्रसरद् यशाः ॥४०॥

मुनिभिस्त्वां **विदुष्मन्तं, विदुष्यं**[1] **विदुषां** चयः ।
किं हित्वाऽन्यसुरान् सक्तान्, **यूनः शून** इव श्रयेत् ॥४१॥

**मघोनो**ऽर्च्य **मघोन्या** च, सन्तोषामृतपा[2] त्वया ।
**राज्ञो राज्ञ्याः** समुद्रस्य, शिवायाश्च कृतं सुखम् ॥४२॥

**निःसीमनि** पदाब्जे स-**द्धाम्नी** निर्धूत**कर्मणी** ।
तव हृद्**वाम्नि वार्त्रघ्नः**[3] स**ङ्घो न्य**स्यानिशं स्मरेत् ॥४३॥

वन्दे **सुपर्वणां** सेव्यं, त्वां प्राप्तं शिव**धामनि** ।
तमो**घ्नन्तं** जिनाऽनन्तं, नमज्**जन्तौ** पितुः समम् ॥४४॥

**भान्ती** तनुस्ते[4] **पुनती तुदन्ती, श्यन्ती हरन्ती** च तमोऽशु**भाती** ।
नेत्रे च नेमे **द्युसदो द्यु**चक्रु-र्महैर्भुवं त्वां स्तुवतोऽप्रिया **द्यौः** ॥४५॥

*इति हैमव्याकरणकतिपयोदाहरणमयः श्रीनेमिस्तवः तृतीयः ॥छा॥*

•

---

टि० : १. विदुषि साधुः - विदुष्यस्तम् । २. सन्तोषामृतं पिबतीति सन्तोषामृतपाः, तेन । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् । ३. वृत्रघ्नो देवेन्द्रस्याऽयं - वार्त्रघ्नः । ४. भान्ती तनुरस्तीति सम्बन्धः, एवं नेत्रे च । एवं सर्वत्र ।

श्लो० : ४०. सू० १०२-१०४ । ४१. सू० १०५, १०६ । ४२. सू० १०६-१०८ । ४३. सू० १०९-१११ । ४४. सू० १०९, १११-११४ । ४५. सू० ११५-११८ ।

## ॥ श्रीपार्श्वनाथस्तवः ॥

॥ द्वितीयाऽध्यायस्य द्वितीयः पादः ॥

अर्हन्तं नौऽमि तं पार्श्वं, **हेतुं कार[क]**वज्जने ।
सत्क्रियाणां तपः**कर्त्ता, स्वतन्त्रो** योऽभवद् व्रते ॥१॥

त्वां नमन् को न **दुष्कर्म,** दहेदन्यांश्च मोचयेत् ।
मार्गं याति सतो **हर्षं**, गमयेद् भोजयेद् **वरम्** ॥२॥

त्वं बोधयन्नतो येना-ऽध्यापयन्**नागमं मुनीन्** ।
मोदयन् नाथयंस्तैश्च, व्रतं शं तेन वाहय ॥३॥

न **वृषान्** वाहयेद् भारं, भक्षयेन् न **शुनो मृगान्** ।
सत्**क्रियां** कारयेन् नान्यै-**र्धर्मं** यं त्वमचीकरः ॥४॥

देशं विहारयन् **साधून्**, भैक्षमाहरयंश्च **तैः** ।
**भव्यान्** दर्शयसे **श्राद्धै**-श्चाभिवादयसे तथा ॥५॥

दयमानं **शिवं** द्यौश्च, त्वं स्म**रेन्नपरस्य** ना ।
**सर्पिषो** नाथते नाथ !, न तैलं हि विशेषवित् ॥६॥

उपस्कर्त्तुं **गुणान्** क्षान्तैः, सज्जं **त्वां** न रुजोऽरुजन् ।
**गोश्च** प्रभावतो नोज्जा-सयतः पिषनश्च **ते** ॥७॥

निर्हन्ति[१] **नाङ्गिनां** दीव्येत्, पणायेद् व्यवहृत्य च ।
**सहस्रस्य शतं** वा न, प्रदीव्यति नतस्त्वयि ॥८॥

नाऽक्षैर्देवयतेऽन्येन, जनो**ऽक्षांश्च** न दीव्यति ।
**मतम**ध्यास्य **मार्गं** ते-ऽधितिष्ठन् **साम्यमा**ऽऽवसन् ॥९॥

---

टि० : १. त्वयि नतोऽङ्गिनां न दीव्येत्, अङ्गिक्रयविक्रयक्रियां न कुर्यात्, तथाङ्गिनां पणायेन्नङ्गिनो द्यूतपणं न कुर्यात्, तथा सहस्रस्य व्यवहृत्य क्रयविक्रयं कृत्वा न सहस्रस्य शतं वा प्रदीव्यति, रिक्तसहस्रं शतं वा पणं न करोतीत्यर्थः ।

श्लो० : १. सू० २।२।१, २ । २. सू० ५ । ३. सू० ५ । ४. सू० ६-८ । ५. सू० ८, ९ । ६. सू० १०, ११ । ७. सू० १२-१४ । ८. सू० १५-१७ । ९. सू० १९-२१ ।

**श्रेयो**ऽभिनिविशतेऽसौ, **मासमास्ते** च योगतः ।
**गोदोहं** यस्य ह्यास्से, मुदं **वाचा** ददद् **गवे** ॥१०॥

**दिवे** न स्पृहयेत् कुप्येत्, **मोहाय** द्रुह्यते **भुवे** ।
स **लोभाद्** विरमेद् यस्य, **चित्तान्नान्यत्र** गच्छसि ॥११॥

**स त्वं** जय **प्रभो** ! दोषाः, समयाऽस्थुर्न **यं** सुराः ।
निकषा **यं** स्थिता **लोकं**, हा धिक् च त्वयि **दुर्धियम्** ॥१२॥

अन्योऽन्तरा **भुवं द्यां** च, प्रभुस्**त्वामन्**तरेण न ।
तेन **त्वां** सन्त इत्यागुः(हुः), **पद्मं** येनाऽलयो यथा ॥१३॥

**द्या** उपर्युपरीयुस्**त्वां**, नता शक्राश्च सर्वतः ।
अभितोऽवीजयन् देवा-श्चामरैः परितो गुणाः ॥१४॥

**अभ्यशोकं** प्रभो!ऽनु **त्वां**, **रत्नवप्रं** परिस्थितम् ।
सन्तोऽहरहरत्येयु-र्न तुन्द्यां प्रत्यनादराः ॥१५॥

त्व**ज्जन्मोत्सवमन्**वायुः, सुरास्तच्चा(तत्त्वा?)मुपेतरे ।
देवा ग्रहा **इवान्वर्कं**, त्वं नतान् बहुरक्षसि ॥१६॥

**सत्पथं** पृच्छतः **साधून्**, **मनस्त्वां** नयतः सदा ।
भवानन्वशिष**द्धर्मं**, स्वामाह(?) नतिमग्रहीत् ॥१७॥

**सर्वघस्त्रान्** सुराऽऽनम्य, **मुहूर्त्तेन** व्यधुस्त्वया ।
गणेशा द्वादशाङ्गानि, **ध्यानेन** ज्ञानमापि च ॥१८॥

**भामण्डलेन** बुद्धस्त्वं, **शक्रैः** सह **सुरैः** समम् ।
**दैत्यैः** साकं **नरैः** सार्द्धं, देशनोर्व्यां स्थितो **जनैः** ॥१९॥

---

टि० :

श्लो० : १०. सू० २२-२५ । ११. सू० २६, २७, २९ । १२. सू० ३१-३३ । १३. सू० ३३ । १४. सू० ३४, ३५ । १५. सू० ३६, ३७ । १६. सू० ३८, ३९ । १७. सू० ३८-४१ । १८. सू० ४२-४४ । १९. सू० ४४, ४५ ।

**प्रकृत्या** दर्शनीयस्त्वं, **शिवे**[1]नोत्सुक! चेन्नतः ।
**राज्येना**ऽलङ्कृतं **स्त्रीभि**-र्दिवा तत्किं सृतं **श्रिया** ॥२०॥

सञ्ज्ञानानो **गुणैः कामे**-ऽवबद्धः संप्रयच्छते ।
**द्विद्रोणेन** जडो धान्यं, **कुस्त्रिया** ननु तेऽर्चने ॥२१॥

**मह्यं** देहि **मुदे** शं त्वं, **यस्मै** साम्यमरोचत ।
शक्रोऽश्लाघिष्ट **लोकायै-क्षथा ज्ञानाय** षोऽवसन् (सोऽवसत्?) ॥२२॥

वाक् ते **लाभाय मुक्ताभ्यः**, स्वात्यम्बुवदकल्प्यत ।
पात्रेऽन्यत्र तु **तापाय**, सा मुक्तेव तडिद् भवेत् (?) ॥२३॥

**सद्ध्यानाय** वनेऽस्थास्त्वं, **पुरे** ग्रामं च नाऽऽगमः ।
नत्वा हितं सुखं **चोर्व्यै**, त्वां मन्ये द्यां **तृणाय** न ॥२४॥

**जीवेभ्यो**ऽस्तु शमायुष्यं, **लोकानां** क्षेममन्वहम् ।
अर्थश्च सिद्ध्यतु स्वस्ति, त्वन्मतस्थितवागिति ॥२५॥

भद्रं ते त्वन्**मताया**ऽस्तु, नमस्यंस्ते जनः प्रभुः ।
**मोहच्छिदे** निवृत्तोऽघा-दासिद्धेः शर्म चाश्नुते ॥२६॥

न्यस्तोर्वी **पर्यभव्येभ्यः**, **केवलात्** प्रभृति त्वया ।
धर्मे ततो **बहिर्मोहात्**, कोऽन्य**स्त्वत्** प्रति पश्चिमः ॥२७॥

दोषा(:) **स्तोकाज्जिता ज्ञानाद्**, दूरे **कृच्छ्रात् त्वद**न्तिके ।
गुणास्ते **स्युरदेवस्या**-ऽज्ञासीत् त्वां **कुधियां** गणः ॥२८॥

उपर्यधः **क्षतेः** कीर्त्तिः, परस्तात् ते ययौ स्थितः ।
न मोहः पुरतः कामः, पुरस्ता**ज्जेतुरंहसाम्** ॥२९॥

---

टि० : १. हेतुना ।

श्लो० : २०. सू० ४६-४९ । २१. सू० ४९-५२ । २२. सू० ५३-५५, ५८, ६० । २३. सू० ५५, ५९ । २४. सू० ६०, ६३-६५ । २५. सू० ६६, ६८ । २६. सू० ६६ । २७. सू० ७१, ७२, ७५ । २८. सू० ७७-८० । २९. सू० ८२ ।

भेदकोऽर्त्तेर्द्विषन् **भीते**-र्नेता द्यां त्वां **शिवस्य** च ।
पुंसां **तवाऽऽ**सिका सिद्धौ, कृतिः **क्षान्ते**स्त्वया **धृतेः** ॥३०॥

बिभित्सा भेदिका**ऽघस्य**, **तव** घात्यो मदस्**त्वया** ।
लोभो जेयोऽसनीया भी-र्नेतव्यं च मुदं जगत् ॥३१॥

**दयामिच्छुर्जगत्त्र**प्ता, **विद्वांस्त्रा**तुं रतो **गुणान्** ।
**दधानः** शर्म **लेभान-स्तन्वन् ज्ञानञ्च** वावहिः ॥३२॥

त्वां योगिनां **मतं** सद्भिः, सुलभं कारकै**र्व्रतम्** ।
श्रितवद्भि**र्नतं** देवै-स्तत्त्वं **सुज्ञानमा**स्तिकैः ॥३३॥

**शिखिनो** नृत्तवत्तप्तं, निराम्नायं युधाङ्गिभिः ।
विधिज्ञाः कामुका **मुक्ते**स्तत् त्वदाज्ञां प्रपादुकाः ॥३४॥

**निर्वृतिं** गमिनोऽप्यन्ये, यान्ति **मासे** द्विरम्बुपाः ।
द्विर्भो ! जिनोऽपि मासो न, **मोक्षे** लक्षं नु दायिनः ॥३५॥

**व्रते** कुशलमायुक्तं, तपसोऽधिपतिं **श्रियाम्** ।
त्वां **दिवि** स्वामिनो भेजुः, **स्वभ्रे** च भुव ईश्वराः ॥३६॥

**सिद्धान्ते**ऽधीतिनोऽतीत-पूर्विणोऽघं ततर्षयः ? ।
साधवः **पौरुषीमाने**, **छायायां** त्रिपदान्यदुः (?) ॥३७॥

**दोषेष्व**साधवः **साम्ये**, निपुणास्त्वयि वीक्षिते ।
अहृष्यन् भाष्यमाणे च, त्वया धर्मे सुनिर्मले ॥३८॥

सर्वार्थसिद्धिर्यास्त्यून - **सप्तरज्जूषु** गोः सुरैः ।
तस्या नाप्येत तेनाप्तेः, सिद्धिर्दादशयोजनी ॥३९॥

---

टि० :

श्लो० : ३०. सू० ८३-८६ । ३१. सू० ८७-८९ । ३२. सू० ९० । ३३. सू० ९०, ९१ । ३४. सू० ९२, ९३ । ३५. सू० ९४-९६ । ३६. सू० ९७; ९८ । ३७. सू० ९९, १०२ । ३८. सू० १०१, १०३ । ३९. सू० १०७ ।

**लोकस्य रुदतो**ऽप्यात्त-दीक्षं **नृषु** च नाकिनाम् ।
प्रशस्यं त्वां जनः पश्यन्, **पक्षात्** भवेन्न मासि वा ॥४०॥

पृथक्**कोपेन मानाच्च**, नाना **दम्भेन** भो ! भृतः ।
न त्वं भाग्यादृते पुण्यं, चाप्यसे पापहृज्जनैः ॥४१॥

विनाऽऽ**लस्यं प्रमादेन**, **मोहाच्च** त्वां श्रये तपः ।
**मेरुं** पूर्वेण सोत्पद्य, सिद्ध्येदिन्दोः सम**ैर्गुणैः** ॥४२॥

यो **वित्तेन निमित्तेन**, हेतोः **स्वर्गाच्छिवस्य** च ।
**राज्यार्थाय** च **मुद्यर्थे**, त्वां भजेत्तस्य तद् भवेत् ॥४३॥

**यो** हेतुः सत्यवाग् हेतुं, **यं** सत्पूज्योऽसि हेतुना ।
**येना**ऽदोषो **यतो** हेतो-र्ज्ञानी **तस्य**[१] **त्वमि**ष्यसे ॥४४॥

**दूरेण** ते कर्णं मदश्च **दूराद्**, **दूरे** स्मरोऽगात् त्वदघं च **दूरम्** ।
प्रापुर्गुणास्ते**ऽन्तिकमन्तिकेन**, **क्षमान्तिकात्** त्वच्च **दयान्तिके** श्रीः ॥४५॥

यः **फल्गुनीषु** गतमर्कमफल्गुवल्गा-
धाम्नाऽजयस्तमिह पार्श्व ! नमाम्यहं त्वाम् ।
स्तुत्वा च वो **वयमिति** क्रमपङ्कजेषु
सद्भक्तिमेव सततं स्पृहयाम उच्चैः ॥४६॥

*इति हैमव्याकरणकतिपयोदाहरणमयः श्रीपार्श्वनाथस्तवश्चतुर्थः ।*

•

---

टि० : १. तस्य हेतोस्त्वमिष्यस इत्यर्थः ।

श्लो० : ४०. सू० १०८-११० । ४१. सू० ११३ । ४२. सू० ११५-११७ । ४३. सू० ११८ । ४४. सू० ११९ । ४५. सू० १२० । ४६. सू० १२२, १२३ ।

## ॥ श्रीमहावीरस्तवः ॥

॥ द्वितीयाऽध्यायस्य तृतीयः पादः ॥

वीरं स्तौमि **तिरस्कृत**-मानं भक्तिपुरस्**कृतः** ।
**तिरःकृताऽघपुंस्कान्तं, नमस्कृत्य** पुरस्य तत् ॥१॥

श्रेयस्कारि **तपस्काम-महस्पात्रं शिरस्पदम्** ।
तत्त्वां येन **पयस्कल्पं**[1]**, यशस्काम्यन्**नरो नमेत् ॥२॥

**सुरोचिष्काऽधनुष्काम्य**-न्नाथ ! **निष्कोप** ! **दुष्कृत** ! ।
**नाविष्कृतचतुष्पुण्यं, द्विष्कै(:) त्रिष्पूजितो** दिने ॥३॥

वपुःखर्वितहे**मार्चि**[2]-**ष्प्राप्तं चतुष्प्रियं** प्रभो ! ।
**भ्रातुष्पुत्रं** सुपार्श्वस्य, **कस्को** न त्वां **नुनूषति** ॥४॥

**आयुःष्टोम**विदो **निष्णो, हवींषीव**[3] **लिलिक्षति** ।
वाक्यानुत्कः **प्रतिष्णात**!, प्रतिस्नातेद्धगीर्षु[4] ते ॥५॥

**मातुःष्वसृपितृष्वस्रो**-भवान्नासिष्ट **विष्टरे** ।
**गविष्ठिर** इवाग्निष्टु[5]-**दग्निष्टोमाय** पुंस्विन ! ॥६॥

**श्रीषेणार्च्याभिनिष्ठान**[6]-**वृत्ताङ्गुष्ठ**नखस्थितः ।
**गोष्ठे रोहिणिषेणाऽर्च्यः, कुष्ठले परमेष्ठ**धीः ॥७॥

**अदुःषेधोषितप्रष्ठ** !, त्वं **सिषेवयिषु**र्धृतिम् ।
**अभीरुष्ठान** ! **निष्टप्त**- रै **सुषन्धि**वपुष्टमः ॥८॥

---

टि० : १. ईषत्परिसमाप्तं पयः - पयस्कल्पम् । ईषत्परिसमाप्ते कल्पप्प्र० । एवंविध यशस्काम्यन् । २. वपुषा खर्विता हेमार्चिर्येन । ३. घृतानीव । ४. प्रतिष्णातं निर्मलं यत् प्रतिस्नातं सूत्रं तस्य या इद्धा गिरस्तासु । ५. अग्निहोतृद्विजो हि अग्निसमूहा यान्यकुलेषु न गच्छति । ६. अभिनिष्ठानो वर्णः विसर्गः इत्यर्थः ।

श्लो० : १. सू० २।३।१-३ । २. सू० ४-७ । ३. सू० ८-१० । ४. सू० ११, १३-१५ । ५. सू० १५, १७, २०, २१ । ६. सू० १६-१९, २३, २५ । ७. २४, २६-२८, ३० । ८. सू० ३१-३७ ।

त्वां **सिसाहयिषुं** कष्टं, **सिषञ्जयिषु**मार्जवम् ।
सुसूर्षुः[1] कर्म **तुष्टूषुरभिष्टुत्यं** न्यघादघम् ॥९॥

मोहोऽ**भ्यषेण** यत्त्वां ना-ऽ**भिषिषेणयिषु**र्जगत् ।
भाऽ**धिष्ठितं** निषिद्धांहो-ऽ**भिषिक्तं निषिषेध** भीः ॥१०॥

बुद्ध्या योऽ**भ्यषजद्** बाल्ये-ऽ**भ्यषिञ्चन्** यं च वासवाः ।
**वितष्टम्भ** स **विष्टब्ध-निस्तब्धा**रिर्जिनो भयम् ॥११॥

**सावष्टम्भा अवाष्टभ्नन्, धर्मोपष्टम्भकं** सुराः ।
यं सदा **व्यष्वणद्** योऽन्न-**मवाषिष्वणद**क्षति ॥१२॥

यः साम्ये **न्यषदन्** मोक्षे, **निषसाद विषादहृत्** ।
शं **न्यषेवत** लक्ष्म्या सा-भिष्टङ्गं **परिषष्वजे** ॥१३॥

**विषयाऽनिषितो** यस्तं, **विषिषेवे** गुणैर्दिशः ।
स **लि(नि)षीव्यल्(त्)** श्रिया नार्त्तिं, **विषहेत परिष्कृतः** ॥१४॥
विशेषकम् ॥

**व्यष्टौद्** यस्त्वां **विसोढार्त्ते, न्यस्तौद्** गान्ते **न्यषीसहन्** ।
नान्यं **संन्यषहिष्टा**ऽशं, **पर्यष्वजत** स श्रिया ॥१५॥

**विष्यन्दिमदनिष्यन्दे, भविष्कन्तांशु विस्फुरन्** ।
**परिस्कन्त**तमो नन्द, **निष्फुलद् विस्फुरद्** गुणः ॥१६॥

नत्वा **निःषमसुस्वप्न-विषूते विषमा**ऽरिजित् ।
त्वां **सुषुपेत**कल्याणे, नरैः **प्रादुःषदिन्दरैः** ॥१७॥

**सेसिच्यते** नतिं यस्ते, संवरे सोऽ**भिसोष्यति** ।
शं **विष्यात् सुपिस्स्येत**, शिवे तेनाऽ**भिसेधिना** ॥१८॥

---

टि० : १. 'षूत् प्रेरणे' । 'णिस्तोरेवा०' (२।३।३७) षत्वाभावः ।

श्लो० : ९. सू० ३७-३९ । १०. सू० ४० । ११. सू० ४०, ४१ । १२. सू० ४२, ४३ । १३. सू० ४४-४६ । १४. सू० ४६-४८ । १५. सू० ४९ । १६. सू० ५०-५४ । १७. सू० ५६-५८ । १८. सू० ५८-६२ ।

**नृणां** निस्तारणं **पुष्णन्**, दर्शनार्जववर्द्धन ! ।
व्रणानां क्षालनं कुर्वन्, **द्रुणसाऽर्च्योऽस्य दुर्ण्णसः** ॥१९॥

**प्रवणे गिरिनद्यन्त-र्वणे शिग्रुवणे** स्थितः ।
**क्षीरपाणमाषवन-सुरापाणाग्रणी**नतः ॥२०॥

त्वं स **त्रिहायणाश्वेक्षु-वाहणो**र्वीशवन्दितः ।
**अपराह्णा**न्तचारित्र-भूरिभावेन सेव्यसे ॥२१॥

**प्रपक्वानि** शुभानीच्छन्, **दोषहाणि प्रयाणिराम्** ।
**प्रणमन् वृक्षकामेण**, त्वत्पदान्यस्तदु**र्नयः** ॥२२॥

प्रनष्टमर्मवा[क्]पाणि, वाक्पाण्य**न्तर्ण्णयामि** ते ।
शरद्योत्तोष्ण**दीर्घाह्न्या-महं** सद्धर्मभाविनः ॥२३॥

**प्रहिणोषि** शिवे भव्यान्, **प्रमीणासि** भयं जगत् ।
**प्रणिमाय प्रणिदाया-ऽप्रणश्यत् प्रणिपातिनाम्** ॥२४॥

**प्रणिगद्याऽप्रणिदेह्य**, तत्त्वं **प्रनिकरोषि** शम् ।
**प्रणिपच्य** तमोऽसीमा, **प्रणिस्यत् प्रणिहंस्ययम्** ॥२५॥

यः स्थावरः **प्राणिणिषेद्**, योऽङ्गी **पर्यणिति** त्रसः ।
**प्राणपर्यानिनयिष्येत**, स त्वया न **प्रहण्यते** ॥२६॥

**प्रहण्मोऽ**घं **प्रहन्मोऽ**र्त्तिं, त्वां **प्रहीण ! प्रनिन्दनम्** ।
नत्वा **प्रमङ्गनं** पुण्य-**प्रङ्खणैक ! प्रमेहणम्** ॥२७॥

शिव**प्रयाप्यमाणाय, निर्विण्णाङ्गी प्रपावनम्** ।
**प्रप्यानः** पुण्य**प्रख्यान** !, **प्रभानेक** ! **प्रकामन** ! ॥२८॥

देशे**ऽन्तरयने सर्पि-ष्पाने**ऽ**न्तर्हण्यते** रुचिः ।
त्वया मुत्**प्रावनद्धे**न्द्र-प्रणतास्त**प्रवेपना** ॥२९॥

---

श्लो० : १९. सू० ६३-६५ । २०. सू० ६६-७१ । २१. सू० ७२-७४ । २२. सू० ७५-७७ । २३. ७५-७८ । २४. सू० ७७-७९ । २५. सू० ७९, ८० । २६. सू० ८१, ८२ । २७. सू० ८३-८८ । २८. सू० ८८-९० । २९. सू० ९०-९३ ।

तेऽघं **प्रघ्नन्ति** लोभं च, प्रभो ! **क्षुभ्नन्ति** तद्यशः ।
**नरीनर्त्य**भितो नम्रा, ये भवन्ति भवद्गुणान् ॥३०॥

**सहसे ष्ठीवनष्ट्यानं, क्लृप्तसङ्कल्पितो**ऽङ्गिनाम् ।
**कृपणाः** सत्**कृपीटत्वं, पलायन्ते** स्म शत्रवः ॥३१॥

जगन्नि**जेगिल्यत** आप्तयस्तं, मोहं लसद्दोः **परिघो गिलंस्त्वम्** ।
**जवोष्ठपर्यङ्कजितर्फिलर्षे, पल्यङ्कनूतः पलियोग**जीयाः ॥३२॥

*इति हैमव्याकरणकतिपयोदाहरणमयः श्रीमहावीरस्तवः पञ्चमः ।*

•

## ॥ श्रीवीरस्तवः ॥

॥ द्वितीयाऽध्यायस्य चतुर्थः पादः ॥

यस्याब्धिदुहितु**र्दात्री**, भेहिन् ! **मुत्कारिणी** च वाक् ।
**रक्षन्ती** विदुषां वीरं, तं **प्राचीशा**र्चितं स्तुवे ॥१॥

**द्विपद्या**दिवरायास्ते, गिरो धूताघ**धीवरी** ।
भावरीष्ट स्मरा वाचा, प्रजासीत्तत्त्व**दृश्वरी** ॥२॥

**कुण्डोध्नी पञ्चहायन्य-शिश्वी** न स्याद् यथेश ! गौः ।
तथा शर्मानमन् मूर्ध्नी, **सुराज्ञी** जनता त्वयि ॥३॥

भारत्याश्रव्य**सीम्ना** ते, प्रीता**जा**दि**सुपर्वया** ।
श्रुतया गुणगौर्याकै-र्नास्यन्ते **त्रिपदा** ऋचः ॥४॥

**कुमारा**दि**प्रिये रात्रीं, त्रयीं** पर्षदि जल्पति ।
**त्रिलोकी**शेन ! रिक्तोर्व्वी, **त्रिकाण्डी द्विपुरुष्यपि** ॥५॥

**नागीः कालीस्**तरी **गोणीः**, प्रोज्झ्याश्वाः **केवली**युतम् ।
**नीलीस्त्रां(स्तां) रोहिणी**शास्य, **समान्या** स्तुवते नृपाः ॥६॥

---

श्लो० : ३०. सू० ९४-९७ । ३१. सू० ९८-१०० । ३२. सू० १०१-१०५ ।
१. सू० २।४।१-३ । २. सू० ४-६ । ३. सू० ७-९, १२ । ४. सू० १३-१७ । ५. सू० १८, २०, २२, २४, २५ । ६. सू० २६-३० ।

**सत्कटी कबरीयुक्ता,** यं **कामुक्या**ऽपि नाक्षिपन् ।
**शोण्यो** घुसृणधुल्यात्र, तत्र ध्यानावनौ गतिः ॥७॥

**शक्ती** कुप**द्धती हानि**-मुक्तं **शक्तिं** गुरुं श्रितम् ।
**पट्वीं** त्वां **रोहिणी श्येनी,** रुचा **शक्ती** सुराल्पनौत् (?) ॥८॥

**सुकेश्यो भासुरक्रोडाः, कम्बुकण्ठ्यकृशोदराः** ।
**सुमुख्यः स्वङ्ग्य** इद्धोष्ठ्यः, **पलिक्नी**व त्वयोज्झिताः ॥९॥

**दीर्घपुच्छ्या मणिपुच्छ्या,** व्यन्तर्या क्षुभित ! प्रभो ! ।
तव कीर्त्या **गुणक्रीत्या,** द्योरज्योत्स्ना **विलिप्त्य**भूत् ॥१०॥

**भालदीप्ती शालिजग्धी, देशपत्नी महापतिः** ।
**असपत्नी सुपत्नी** स्यात्, त्वया **दन्तमिता** प्रजा ॥११॥

**अन्तर्वत्नीं** जहौ **पाणि-गृहीतीं कुक्कुटी**मिव ।
**क्षत्रियां मुद्गपर्णीं** च, **शङ्खपुष्पीं** तव स्मरन् ॥१२॥

**वासीफली दर्भमूली, प्रष्ठी वृषाकपाय्य**पि ।
**मनावी** स्यान्न **शर्वाणी-न्द्राणी** त्वां नमतो मुदे ॥१३॥

त्वां **मातुलान्युपाध्यायी, सूर्याणी** निर्ममोऽनमत् ।
तमोहि**मान्यर्क**भवाऽ-**रण्यानीं** लङ्घते जनः ॥१४॥

**आवट्या क्षत्रियाण्यार्या, लौहित्यायन्य**पासन ! ।
ध्यानं **गार्ग्यायणी दाक्षी, कौरवी(कौरव्या)यण्य**धीशते ॥१५॥

**मद्रबाहूः** कदूलाकृः(?) **कद्रू** रज्जूवदुज्झिता ।
**करभोरूः कुरूः** सुरू-**र्नारी पङ्गू**रिव त्वया ॥१६॥

**बालाक्या**हत**कारीष-गन्ध्या** नौपगवीव ते ।
**क्रौड्या भोज्या** च **पौणिक्या-ऽऽहिच्छत्री युवति**र्मनः ॥१७॥

श्लो० : ७. सू० ३०, ३१ । ८. सू० ३२-३६ । ९. सू० ३७-४० । १०. सू० ४१, ४२, ४४, ४५ । ११. सू० ४६-५० । १२. सू० ५२-५६ । १३. सू० ५७-६२ । १४. सू० ६३-६५ । १५. सू० ६६-७२ । १६. सू० ७३-७६ । १७. सू० ७७-८१ ।

**दैवयज्ञ्या शौचिवृक्ष्योः, सौगन्धीपतिरीशता ।**
**सौगन्धीबन्धूरीत्वत्वा(?), मौद्गन्धीमात** आनमन् ॥१८॥

**मा(म)नुषीषु** तथा तेऽम्बा-मुख्या **मत्सी** चलाक्षिजित् ।
**सौरीप्रभासु** भा यद्व-दहः **पौषं** दिनेषु वा ॥१९॥

न **गार्गकमिव** स्वामिन्, **गार्गीयति** ततं त्वयि ।
अष्टरामहयं **राज-न्यकं बैल्वकवैणुकम्** ॥२०॥

**निःशस्त्रिरतिरम्भोरु-र्भावरीनुष्णगु** प्रभो ! ।
सक्तयसि श्रि**येशोऽर्द्ध-पिप्पली**वदखण्डयन् ॥२१॥

धीर्न स्थिरीकृताऽ**धिस्त्रि**, भीरु**लक्ष्मिसुता** स क(ः) ।
त्वया **रेवतिमित्रः** श्री-**गङ्गाव(म)ह** ! सुरीनत ! ॥२२॥

**नाजत्वं रोहिणित्वं** सो-ऽश्नुते त्वां **गोणिशालिना** ।
**भ्रुकुंशा भ्रकुटी** भीमो, **मालभारी** यशोमहेत् ॥२३॥

**लक्ष्मिका वधुका** प्रीत्यै, **पट्विका खट्विका** न ते ।
**सुवधूकाः सलक्ष्मीकाः**, सुराः **सुरमका** नमन् ॥२४॥

त्वद्गीः सुधा पीकां नौती(ति), **द्विकां** शुद्धान्न**जीवकाम्** ।
**धीस्वकां** मुनिमालाकां, सदयाऽ**स्विकां [ज्ञकां] ज्ञिकाम्** ॥२५॥

भाषा स्यान्नि**त्येका(यका)** हन्त्ये-**षिका** ते दुर्गती **द्वके** ।
**मामिका वर्त्तिका** श्येनी, रुषावल्ल्यसि**पुत्रिका** ॥२६॥

गीर्**मामिका सुनयिका ध्रुवका सका** ति, **वृन्दारिकां** भवरिपु**क्षिपकां** गुणालिम् ।
श्रीवीर! ससति**यका** तव **तारकेश** !, रुग्**वर्णकां** जयति सज्जनतारिका श्रीः ॥२७॥

*इति हैमव्याकरणकतिपयोदाहरणमयः श्रीवीरस्तवः षष्ठः ॥छा॥*

---

श्लो० : १८. सू० ८२-८५ । १९. सू० ८७-९० । २०. सू० ९१-९५ । २१. सू० ९६, ९७ । २२. सू० ९७-९९ । २३. सू० १००-१०३ । २४. सू० १०४-१०७ । २५. सू० १०८, १०९, १११ । २६. सू० १०८-११० । २७. सू० १०८, १०९, १११-११३ ।

## ॥ श्रीवीरस्तवः ॥

॥ तृतीयाऽध्यायस्य प्रथमः पादः ॥

स्तोष्ये सुरासुरैः सेव्यं, परमेशं समासतः ।
जितमोहं महावीरं, त्रिलोकीहतमन्वहम् ॥१॥

तं साम्यसुस्थितं वीरं, **प्रणतोऽभिष्टुवेऽ**भवत् ।
विंशतेरुपसर्गाणां, योगो यद्देहधातुभिः ॥२॥

**ऊरीकृत्या**दरं चित्तं, **स्थिरीकृत्या**वगत्य ये ।
**सत्कारार्हं** नमन्ति त्वां, क्ष्मामलङ्कुर्युरीशते ॥३॥

त्वद्गिरं ये **मनोहत्य**, **पुरस्कृत्य** मुदं पपुः ।
ते **तिरस्कृत्य** रागादीन्, **पाणौकुर्वन्ति** निर्वृतिम् ॥४॥

**द्विनवान्** ब्रह्मणो भेदा-नदिशोऽ**दूरषोडशान्** ।
संयमस्या**ऽर्द्धविंशानि**, मोहस्थानान्यहन् प्रभो ! ॥५॥

त्व**मासन्नदशा** ब्रह्म- गुप्ति**रुपदशा**निव ।
तत्त्वान्यवोच इद्धाङ्ग(:), सिंहमध्य स केवलः ॥६॥

**दण्डादण्डि** न कुर्युस्ते, तर्जनं वा **कचाकचि** ।
यान्ति **पारेभवं** मध्ये, चित्तं ये त्वद्गिरं दधुः ॥७॥

**यावद् भव्यं पर्यभव्यं**, तवेशा योजनं गिरा ।
**अभ्यशोकं** स्थितस्याधि-रत्नसालं सुधर्मधीः ॥८॥

पुष्पन् **सब्रह्म साधूना-मुपयुष्मद् यथाविधि** ।
तपः सोत्सर्गमातन्वन्, **प्रत्यहं** गौतमोऽवसन् ॥९॥

**कुतीर्थिन**स्त्वया साक्षात्, कृतमर्थं **सुनिश्चितम्** ।
**अत्यदोषं** रुषा रक्ता, न भेजु**र्दुर्मति**श्रिताः ॥१०॥

---

श्लो० : २. सू० ३।१।१ । ३. सू० २, ४ । ४. सू० ६, ७, १०, १५ । ५. सू० १९, २० । ६. सू० २०, २१ । ७. सू० २६, ३० । ८. सू० ३१-३३ । ९. सू० ३९-४१ । १०. सू० ४२-४५ ।

प्रमुग्धे **ह्यतिमर्यादे, पर्यध्ययन उत्क्रमे** ।
गोशाले **निर्दये**ऽनार्येऽनुभूतस्ते न मत्सरः ॥११॥

**मध्याह्ने**ऽप्यातपः सेहे, **पूर्वकायाऽधराङ्ग्योः** ।
त्वयाऽ**र्द्धोक्त**मपि त्यक्त्वा-ऽ**ग्रहस्त**स्पृष्टजानुना ॥१२॥

**क्षणजातः स्वयम्बुद्धा**-ऽकम्पयः स्वर्गिरिं [तदा] ।
**व्रतश्रितो द्व्यहाभुक्तः**, क्षणं त्वं प्राप्तचेतनान्(त्) ॥१३॥

**ईषत्ताम्रान्** रुषा दुःख-गता **मदपटून्** स्थितान् ।
**द्विरर्द्धचतसृष्ववी-योना**नृभूषु नारकान् ॥१४॥ युग्मम् ॥

**सैकान्नत्रिंशती** षष्ठी-शते अप्यन्यदुष्करे ।
**त्वत्कृते भूहिता**ऽभूतां, शिवार्ये भवतारकः ॥१५॥

**परःशता**यतं तेऽत्र, त्वन्मतावगता जनाः ।
**सत्पूजका** विजेतारो, मोहस्याऽघस्य **भेदकाः** ॥१६॥

चतुर्विंशेन सार्वाणां, त्वयाऽरीणाहृतिः कृता ।
**तृप्तार्थस्य सतां** साक्षात्, **परमार्थस्य** तत्त्वता ॥१७॥

त्वां **ज्ञातं योगिनामिष्टं, दानशौण्डं** नयोऽभजत् ।
**मर्त्यसिंहं** मतिसूत्र - गता **भस्मनिहुत्य**भूत् ॥१८॥

न वेशो **जात्यहेमाङ्ग**, एकदेवस्त्वमत्यजः ।
दृष्टनष्टां **पुराणौक- जरत्तृणमिव** श्रियम् ॥१९॥

**द्वैमातुर** ! त्रिलोक्यावि ! **त्वयाधिकदयाधन** ! ।
**नृंसिहेन** हतो मोहो-ऽ**रिव्याघ्रः पूर्वसार्ववत्** ॥२०॥

---

श्लो० : ११. सू० ४५, ४७ । १२. सू० ५२, ५३, ५५, ५६ । १३. सू० ५७, ५८, ६२, ६३ । १४. सू० ६४-६७ । १५. सू० ६९-७१ । १६. सू० ७५, ७८, ८१ । १७. सू० ८५, ८६ । १८. सू० ८६, ८८, ८९, ९२ । १९. सू० ९६, ९७ । २०. सू० ९९, १०२, १०३ ।

नासमानगुणान् **श्रेणि-कृतांस्ते चरमाप्तकः** ।
**हताहते**न्द्रियो वक्ति, **सद्भावोत्तमबुद्धिभाक्** ॥२१॥

**पुन्नाङ्गै**स्त्वं श्रितो **देव-वृन्दारक** ! महामुने ! ।
**सर्पिःकतिपयात्काग्नि-स्तोक**वर्धिष्णुरोषभित् ॥२२॥

**कठश्रोत्रियकालापा-ध्यायका**द्यानये नमन् ।
जडा**मुनिप्रकाण्डं** त्वां, तज्जनि**र्गोवशा** फला ॥२३॥

नासीस्त्वं **युवखलति**-र्न वा युवपलसभूः (**युवपलितभूः**) ।
स्वामिन् ! **युववलिनो**ऽन्य-पुंवद् **युवजरन्न** च ॥२४॥

**कुमारश्रमणा तुल्य- विनीता**खिल साधुषु ।
वन्दनाजनि ते **सर्व-श्वेत**कीर्त्तिः प्रवर्त्तिनी ॥२५॥

**रागद्वेषौ** त्वया ध्वस्तौ, **देवासुरनरा**स्ततः ।
दधत **वाक्त्वचं** स्निग्ध-मधीश ! त्वामुपासत ॥२६॥

**अक्षा** मुदे यथा नाथ !, क्रीडानस्त्रिफलार्थिनाम् ।
त्वद्देहागमसिद्धीनां, तथाङ्गानि सतामिह ॥२७॥

गृहवासे मुदं **पित्रो**-र्व्रते **ब्राह्मणयो**र्व्यधाः ।
प्रापो वेत्ति जनो **माता-पितरौ श्वशुरौ** समौ ॥२८॥

गा **अश्ववडवौ** प्रोज्झ्य, समोऽभूः **सुखदुःखयोः** ।
**लाभालाभे खरेभे** च, **रसालामलके** प्रभो ! ॥२९॥

**अश्वेभं** तद्गृहे गर्जे, **भेरीशङ्खस्य** चारवैः ।
स बोध्यते शुभं तस्या, हस्तां हित्वा श्रयेत यः ॥३०॥

**कुशकाशं** भृशं यत्र, जज्ञे **प्लक्षधवं** वने ।
**ऋश्यैणं हंसचक्रं** च, ध्यानं तत्राऽपि तेऽधिकम् ॥३१॥

---

श्लो० : २१. सू० १०३-१०५, १०७ । २२. सू० १०८, १११ । २३. सू० १११ । २४. सू० ११३ । २५. सू० ११४-११६ । २६. सू० ११७, ११८, । २७. सू० ११९ । २८. सू० १२२, १२३ । २९. सू० १३०-१३२, १३६ । ३०. सू० १३४, १३७ । ३१. सू० १३३ ।

असाहि सङ्गमोच्छाहि - **नकुलस्य** व्यथा त्वया ।
**कौशाम्बी भद्रिले** स्थायि, मोदकापूपमुज्झता ॥३२॥

त्वयासि मदकर्मोप-वनं सर्वमहोत्सव ! ।
कीर्त्यास्ते **दधिपयसी, राजदन्तास्तमौक्तिका!** ॥३३॥

**वर्षजातजडारोषा-स्युद्यता आहिताग्नयः** ।
मुधा त्वां जिन ! हित्वे**न्दु-मौलिं** शूलकरं श्रिताः ॥३४॥

**क्षमाप्रियं प्रियश्रेयान्**, ना त्वां **धर्मार्थदं** श्रयेत् ।
**श्रद्धाधीयुक्** शिवस्वर्ग-हेतुं सद्दमसंयमम् ॥३५॥

शीतं त्वयाऽसाहि सहस्य माययोः, स्थितं रवौ **पुष्यपुनर्वसू** गते ।
त्वां चेति यो द्वादशमासिकं स्तुते, वीरप्रभो ! **द्वित्रभवैः** स सिध्यति ॥३६॥

*इति हैमव्याकरणकतिपयोदाहरणमयः श्रीवीरस्तवः समाप्तः ॥छ॥*

•

## ॥ श्रीवीरस्तवः ॥

॥ तृतीयाऽध्यायस्य द्वितीयः पादः ॥

श्रीवीरं स्तौमि तं शक्ति-क्षमे उच्छिद्य मत्सरम् ।
**परस्पराश्रिते** ये श्राक्, द्योतिके **इतरेतराम्** ॥१॥

यथा प्रीणात्**युपाम्भोजं**, प्राप्ता**नुपवना**दलीन् ।
मोदस्तेऽनुपदद्वन्द्वं, तथा**धिक्षिति** देहिनाम् ॥२॥

त्वया वि**नोपलोकेना-** जल्पताग्रे**जने** पुरा ।
इच्छां **सुमगधं** हित्वा, बद्रशोऽ**ध्यटवि** स्थितम् ॥३॥

त्वां स्वामीयति रम्याङ्गं, यस्तस्मिन् स्यान्**ननु** स्मरः ।
**स्त्रियंमन्यो** विशेषं सो-ऽदर्शय **ओजसाकृतम्** ॥४॥

---

श्लो० : ३२. सू० १४१, १४२ । ३३. सू० १४५, १४९ । ३४. सू० १५२-१५५ । ३५. सू० १५७, १५९, १६० । ३६. सू० १६२, १६३ । १. सू० ३।२।१ । २. सू० २ । ३. सू० ३-६ । ४. सू० ७, ९, १२ ।

**तपसाकृतं** सद्बोध - त्वामाराध्य नरो भवेत् ।
**जनुषान्धोऽपि** सद्दृष्टि-**स्तमसाकृतं** दोषजित् ॥५॥

प्रतिरू**पात्मनातुर्या**-ऽध्यायः सा**ध्वात्मनेपदम्** ।
प्राक् **परस्मैपदमथ**, लक्षणे त्वन्यथाऽरमथाः ॥६॥

**स्तम्बेरमगतेऽरण्ये** - **तिला मध्येगुरुश्रियम्** ।
**कण्ठेकाल**यशोमुञ्च - स्त्वं **पूर्वाह्णेतनार्कमः** ॥७॥

**कुशेशयकरास्यान्ते** - **वासीन्द्रो** गौतमः सदा ।
भेजेऽ**मनसिजस्तें**ऽह्री, भृङ्गः **सरसिजं** यथा ॥८॥

**निःपश्यतोहरः** प्राप, **मनोजदिविजार्चित** ! ।
**वाचोयुक्तिरदेवानां** - प्रियस्यापि न ते स्तुतौ ॥९॥

**मातापितृ**हितो **वाच-स्पतिवास्तोष्पति**स्तुतः ।
**सूर्याचन्द्रमसैर्द्यावा-भूमी** व्याप गुणैर्भवान् ॥१०॥

कीर्त्ति**र्दिवस्पृथिव्यौ** चा-दृ**श्यावस्करते**ऽश्नुते ।
**दर्शनीयतनोः** शेता-यितेश ! पटयेन् मुदम् ॥११॥

**कल्याणीभक्तयो** ये स्तो, **यशोदाभार्य** ! तेऽस्मरन् ।
सद्बुद्धिः **पटुजातीया**, तेषां **वाक्पटुताद्भुता** ॥१२॥

न जह्रुस्ते **मनोराज-द्रूपाः सर्वसुराङ्गनाः** ।
हंसी **व्रजत्तरा विद्वत्-कल्पाः सौभाग्यसत्तमाः** ॥१३॥

**जल्पन्मता चलच्चेली, भाद्गोत्रा विदुषिब्रुवा** ।
स्त्री **पश्यन्तीहतापि** स्यात्, त्वदुक्ता विदुषां मुदे ॥१४॥

**महाविशिष्ट**माहात्म्य !, तस्य **पट्वितरा** मतिः ।
**महाजातीय** ! वाग् येन, महेश ! त्वं हृदि स्मृतः ॥१५॥

---

श्लो० : ५. सू० १२, १३ । ६. सू० १४, १७ । ७. सू० १८, २०-२२, २४ । ८. सू० २५, २६ । ९. सू० २६, २७, ३२ । १०. सू० ३६, ३७, ४१, ४४, ४७ । ११. सू० ४५, ४८, ४९ । १२. सू० ५३, ५४, ५८, ५९ । १३. सू० ६१, ६३ । १४. सू० ६३ । १५. सू० ६४, ६८, ७० ।

त्वां नत्वा **महतीभक्ति-र्महद्भूतमहं** नरः ।
न **महत्तरधीः** कुर्यान्, **मुष्टामुष्टि शराशरि** ॥१६॥

भिनत्त्य**ष्टागवमनोऽ-ष्टापदः कोटरावणे** ।
यथा तथा स्मरो **विश्वा-मित्रादीं**स्त्वन्मतोज्झितान् ॥१७॥

**दन्तावलक्षमशरा-वत्याद्यानी** वृतोऽपुना ।
**नीत्तमुन्निष्प्रतीकारो, मर्माविद्धि** हरन् विभो ! ॥१८॥

नि:**षोडश**कषाय ! त्वत्त्रिपद्या गौतमादयः ।
व्यधु**रेकादशा**ङ्गानि, **षोढा षड्ढा** तपः पराः ॥१९॥

**द्व्यशीतिः** प्रभृतीः पापा, दोषा**नष्टादशा**क्षिपः ।
**त्रयोदश द्वादश** वा-ऽयोगान्त्यसमये जिनाः ॥२०॥

**द्वाचत्वारिंशतं** नाम-भिदोऽर्हं**स्त्रिशतं** जगौ ।
तथा **त्रिनवतिं** जित्वो-पसर्गान् **द्विदशा**न्निशि ॥२१॥

भव**त्पदा**तितां भूरि-**हल्लेखो हृद्य ! हार्दधीः** ।
न सत्**पद्धति**भागिच्छे-**न्नस्तो**ऽस्ततिलपुष्पकः ॥२२॥

**नस्य**श्वासवपुर्ग**न्धो-दपेषं** पिष्टदर्पक ! ।
**केशानु**त्पाट्य **शीर्षण्यान्**, प्राव्राजीः पञ्चमुष्टिना ॥२३॥

त्वमुदध्यदविन्द्वाभ (**दध्यर**विन्दाभ)-गुणो मेरौ जनुः क्षणे ।
**क्षीरोदा**द्यम्भ आनी**यो-दकुम्भैः** स्नपितः सुरैः ॥२४॥

**व्युदगाहा**श्चले शब्द - पूर्वोत्तरपदे इव ।
कामाद्यास्त्वद्गिराऽजान-न्नैहिकामुष्मिके सुखे ॥२५॥

---

श्लो० : १६. सू० ७०-७२ । १७. सू० ७४-७६, ७९ । १८. सू० ७८, ८२, ८५, ८६, ८८ । १९. सू० ९१ । २०. सू० ९२ । २१. सू० ९२, ९३ । २२. सू० ९४-९६, ९९ । २३. सू० १००, १०२, १०४ । २४. सू० १०४, १०५, १०७ । २५. सू० १०६ ।

**धन्यम्मन्यः** समीपे ते, भवाब्धौ **द्वीपमाप्यना** ।
धर्मं **रुजागदङ्कारं, सत्यङ्कारं** शिवाप्तये ॥२६॥

**दिवामन्या** निशा पापं, त्वयि गच्छत्यभूत् सुरैः ।
अग्निभिन्द्यांशुभिर्लो**कं - पृणमध्यन्दिनार्कभ** ! ॥२७॥

**अन्यदर्थादनानङ्ग-तिमिङ्गिलवधे**ऽभवः ।
**भद्रङ्करणं** जातं त्वं, **मोहरात्रिञ्चरा** हतः ॥२८॥

**तिर्यञ्चो**ऽपि सुधा**सध्र्यक्, सम्यक्** तेऽपुर्वचोऽसमम् ।
त्वां **विष्वद्र्यग्गुणं** वाऽऽप्य, **कोऽन्यदीयं** मतं श्रयेत् ॥२९॥

नगधीराङ्गिकल्पाग !, पद्मराग**नखा**नघ ! ।
त्वां **कापथ**हरं प्राप्य, **कद्वदो** न कदर्यधीः ॥३०॥

न सो **कापुरुषोऽकाच्छ-बुद्धिः कोष्णमनाः** क्रुधा ।
**कवोष्ण**गीश्च ते**ऽवश्य-कार्यदेश**(शे)न यः स्मरेत् ॥३१॥

**सततं हन्तुकामो**ऽघं, यस्त्वां **श्रीसहितं** श्रयेत् ।
मुक्तिग**न्तुमनाः** साम्य-**समना**(:) **सन्ततं** स ना ॥३२॥

**सगुणं सहकारुण्यं**, सतां **सब्रह्म** कारणम् ।
नत्वा **सब्रह्मचारी** त्वां, **सधर्मा** च महात्मनाम् ॥३३॥

वीरं तमोऽर्क**सदृशं** विनया**सदृक्षो-ऽन्यादृशा**तिशयशस्तमिति स्तुते यः ।
द्यौः **कीदृगस्य पिहितार्त्तिरनीदृशश्रीः**, सोऽतादृशं शिव**मवाप्य** जगद्व**तंसः** ॥३४॥

*इति हैमव्याकरणकतिपयोदाहरणमयः श्रीवीरस्तवोऽष्टमः ॥ छ ॥*

•

---

श्लो० : २६. सू० १०९, १११, ११२ । २७. सू० १११, ११३ । २८. सू० ११५-११७, ११९ । २९. सू० १२१-१२४ । ३०. सू० १२७, १२८, १३१, १३४ । ३१. सू० १३५-१३८ । ३२. सू० १३९, १४० । ३३. सू० १४३, १४६, १४९, १५० । ३४. सू० १५१-१५४, १५६ ।

## ॥ श्रीसर्वजिनस्तवः ॥

॥ तृतीयाऽध्यायस्य तृतीयः पादः ॥

स्याद्वादरावी **गुणवृद्धिकारी**, श्रीनायको यः **प्रणिधीयतेऽत्र** ।
दत्ताभयः सद्भिरिमं जिनं **नौ-त्सुकायत स्तोतुमु**पासरत्कः ॥१॥

अष्टादशब्रह्मणि स द्विभेदे[1], भवान् भिदश्छित्तकृतादियोगात् ।
विभक्तिषु व्याकृत **वर्त्तमाना**-दिकासु विश्वेश ! दशस्वपीव ॥२॥

सौख्यं **क्रियेता**ऽसि शिवे त्वयाऽऽर्य!, **जितोऽसुदानो दुरसश्च** कामः ।
सत्पर्वमानाय **उपासत** त्वां, तेऽसंशयानां **न्यविशन्त** कृत्ये ॥३॥

**व्यक्रेष्ट** काचा अति अग्र्यरत्नं, **निरस्यतेऽभ्यूहति** नात्मपथ्यम् ।
**व्यजेष्ट** मोहं न शमे **न्ययुङ्क्त**, यः स्वं न नत्या तव **संक्ष्णुते** स्म ॥४॥

वृषो यथाऽ**पस्किरते** रजस्त्वं, **तथाम्बुजैः सञ्चरसे** कृपायाम् ।
**संक्रीडसे तेऽशपतो**[2]ऽवनन्ता, **भुङ्क्ते** सुखं **नानुहरेत**[3] साधोः ॥५॥

त्वमीश ! तत्त्वे **नयसे व्यनेष्ठा**-स्तमोऽ**मृता**ऽघं तव **शीयते** स्म ।
**म्रियेत** मोहो नखभूरिभासा, **भूर्लोहितायेत** महो**ऽद्युतच्च** ॥६॥

त्वां **वर्त्स्यती**हाऽस्य **विवृत्सती**श !, धर्मे रवा**वाक्रममाण** उच्चैः ।
**क्रमेत** ते **प्राक्रमत** स्तुतिं य, [4]**आदत्त नाऽऽपृच्छत** सत्पथं च ॥७॥

**आह्वास्त** मोहं **शमुपायता**ऽसौ, यस्त्वा**मुपातिष्ठत** शिष्टमार्गे ।
**उत्तिष्ठतेऽवास्थित** कर्म **जिज्ञा-सते** स्म सत्यं जिन ! **सङ्गिरेत** ॥८॥

---

टि० : १. सह द्वाभ्यां दिव्यौदारिकभेदाभ्यां वर्त्तते यत् तत् । २. तवावनन्ता ना पुरुषः अशपत स्वरूपं प्रकाशितवान् । ३. साधुसमानशीलो भवेत् । ४. यो ना पुमान् सत्पथं प्रादत्त पृच्छत च तस्य शं वर्त्स्यति भविष्यतीति सम्बन्धः ।

श्लो० : १. सू० ३।३।१, २, ४, ५ । २. सू० ६-१६ । ३. सू० २१, २२, २४ । ४. सू० २५-२९ । ५. सू० ३०, ३२, ३३, ३५, ३७, ३८ । ६. सू० ३९-४४ । ७. सू० ४५, ४७, ५२, ५३, ५४ । ८. सू० ५६, ५९, ६०, ६२, ६३, ६६, ७० ।

**शुश्रूषते** नाथ ! **दिदृक्षते** यः, **सुस्मूर्षते** त्वां च **विवन्दिषेत** ।
**शिक्षेत** धर्मं स विवेक**मीहा-ञ्चक्रे** स्मरान्नो **बिभयाञ्चकार** ॥९॥

तमोऽ**धिचक्रे शमुपस्कृतो**च्चै-र्भवान् गुणौघेऽ**वदतो**पदेशे ।
**संप्रावदन्तेश** ! चतुर्मुखानि, तव स्मरान्ना **समगंस्त** सिद्ध्या ॥१०॥

**संपृच्छते संशृणुते** स्म तत्त्वे, तवाङ्क्ति ते यः **समवित्त** सोऽत्र ।
विष्वक् **तवाऽऽयच्छत**[१] भाविते ये, मां नामयस्व स्मरयानिशं त्वम् ॥११॥

त्वं **वञ्चयेथा** जिन ! **भीषयेथा**, मोहं सदा भापयसे गुणैश्च ।
**विस्मापयेथाः** स्मर **भापना**ऽरी, **नायासयेथाः परिमोहयेथाः** ॥१२॥

जाने **तुदेथा हरसे** च राग-**मुद्यच्छसे** ब्रह्मणि वेत्सि विश्वम् ।
रुच्या रविं **चानुकरोषि** दीपं, **प्रत्यक्षिपो**ऽहं **परिमृष्यसीह** ॥१३॥

शिवं प्रभो ! **पर्यवहो व्यरंसीः**, प्रमादत**श्चोपरमस्य**वद्यात् ।
गव्यांसय**श्चेतयसे** च भव्या-**नबोधयः** कारयसे स्म धर्मम् ॥१४॥

**अकम्पयः** क्रोध**मयोधयो**ऽध्या-**पयो** भयं **प्रावयसीह** लोभम् ।
तमश्च मे **द्रावय नाशया**ऽघं, शं **भोजय** त्वं **जनया**ऽपवर्गम् ॥१५॥

*॥ एकादशः पादः ॥*

॥ तृतीयाऽध्यायस्य चतुर्थः पादः ॥

यस्त्वां **पणायेत्तव** गां **पनायेद्, गोपायिता** क्ष्मा च **ऋतीयते** तम् ।
श्रीः **कामयेतैष तितिक्षते**ऽलं, **जुगुप्सते** नो **विचिकित्सतीह** ॥१६॥

**मीमांसते** तत्त्वमिहाऽ**नसूयन्, दीदांसति** त्वां **भृशमीक्षते** यः ।
**वावन्द्यते**ऽभीक्ष्णमसौ **चकास्ति, नारार्यते** दुःख**मशाश्यते** शम् ॥१७॥

---

टि० : १. प्रससार ।

श्लो० : ९. सू० ७१-७५, ७७ । १०. सू० ७६-७९, ८४ । ११. सू० ८४, ८६ । १२. सू० ८९-९२, ९४ । १३. सू० ९५, ९८, १०१, १०२, १०४ । १४. सू० १०४-१०७ । १५. सू० १०८ । १६. सू० ३।४।१-६ । १७. सू० ७-१० ।

**जङ्गम्यते** नेह स **दन्दहीति**, **लोलुप्यते**ऽघं न **गृणाति** निन्द्यम् ।
मुच्चेच्य ! शं **भावयते** च कष्टं, यः **साहयेत्ते** **कथयेद्** गुणौघम् ॥१८॥

**चिकीर्षतस्तारयसीह** भक्तिं, भव्यांस्तप:**काम्यत** **आर्जवीयन्** ।
मणिं **तृणीयन्** भवने **वनीयन्**, पोतन् भवे नीर**निधीयमाने** ॥१९॥

देशनासदसि ते **पयायितौ**- **जायिते** रजसि मुद् **भृशायते** ।
**लोहितायति** मणी महोभरै-रम्बरे **पटपटायते** ध्वजः ॥२०॥

**वैरायते** कोऽपि न गौश्च **रोम-न्थायते** **कष्टायत** उत्करो न ।
त्वद्देशनोर्व्यां न भयाज्जिनेश !, **बाष्पायते** किन्तु **सुखायते**ऽङ्गी ॥२१॥

त्वयीश ! **सत्यापयता** **नमस्यां**, न **शब्दयेद्धस्तयते** विरुद्धम् ।
लोभान्न **सम्भाण्डयते**ऽणयेच्चा-ऽऽरम्भं सच्चित्तं **व्रतयेत्तपस्येत्** ॥२२॥

शिवं **दयामास** भवांश्च**कासा-ञ्चकार** कायेन धिया **समीधे** ।
**ईक्षाम्बभूवा**ऽमृतमर्त्ति**मोषा-मास** स्मरन्तो **बिभयाञ्चकार** ॥२३॥

त्व**ज्जिह्रयामास** **बिभाय** मोहो, रागोऽपि नोर्जं **बिभराम्बभूव** ।
गुरु**र्विदामास** न ते **विवेदो**-शना बलं कोऽत्र **विदाङ्करोतु** ॥२४॥

ये त्वां नरो**ऽद्राक्षुरिहा**ऽ**तृपंस्ते**-**ऽस्राक्षुर्व्यमृक्षन्** वृषम**ध्यरुक्षन्** ।
गिरो**ऽदधंस्ते**ऽ**चकमन्त** ये च, ते**ऽशिश्रियन्ने**तर**ऽपूपुजंस्त्वाम्** ॥२५॥

सतोऽ**शिषद्धर्ममवोचदारन्**, मुक्तिं रणे योऽसितु**माह्वता**ऽरीन् ।
कीर्त्या**ऽलिपद्विश्वमसिक्त** शर्मा-**ऽगमन्**मुदं सोऽ**पुषद्द्युतच्च** ॥२६॥

तमोऽभिदत्तेन[1] जिनो**ऽजरन्न**, शम**ऽश्वदिष्टं** **समपादि** तस्य ।
धर्मस्ततो**ऽजन्युददीप्यबोधि**, जनोऽवधीर्ष्याशिव **आसि** तेन ॥२७॥

---

टि० : १. कारणेन ।

श्लो० : १८. सू० ११-१३, १५, १७-१९ । १९. सू० २०-२४, २६ । २०. सू० २७-३० । २१. सू० ३१-३५ । २२. सू० ३५-३८, ४०, ४२-४४ । २३. सू० ४६-५० । २४. सू० ५०-५२ । २५. सू० ५३-५५, ५८, ५९ । २६. सू० ६०-६४ । २७. सू० ६५-६८ ।

**अदर्शिषातां** तव येन **पादा-वश्रायिषातां** जिन ! **घानितां**[१]ऽघम् ।
**घानिष्यते** तेन तमः शमश्च, **ग्राहिष्यते** कर्म **विजायिता**[२] च ॥२८॥

त्वामर्चता[३] धीरिन ! **वारिषीष्ट, हारिष्यते** कर्म च **दर्शितेष्टम्** ।
भीर्या(र्घा)**निषीष्ट क्रियते** च साम्यं, **दिव्यास्यते** तस्य शिवं **भवेच्च** ॥२९॥

**त्रुट्येत्त**मोऽस्य **त्रसति** स्मरोऽस्मात्, **क्रामत्य**घं नो स भवे **भ्रमेन्न** ।
खिद्येत यो **भ्रास्यत** आर्जवात्ते, धर्मे **यसन्नीश** ! गिरो**ऽभिलष्येत्** ॥३०॥

**रज्येन्**मते यस्तव **सोऽश्नुते** शं, **तक्ष्णोत्य**घं सन्मति**मक्ष्णुयाच्च** ।
**स्तभ्नाति** लोभं कुधियं **धुनाति, हिनस्ति** मोहं **तुदते** मदं च ॥३१॥

**पुषाण** शं तस्य **तनु** श्रियं च, व्यभेदि मोहो मृदुगीर**दोहि** ।
क्षीयेत दुःखं तव **सृज्यते** गां, यो**ऽसर्जि तप्येत तपांसि** भक्तिम् ॥३२॥

पालं द्रवो**ऽपक्षत** भीर**रुद्ध**, तवान्तिके तीर्थपते!**ऽह्वतेति** ।
पुष्पोत्करो**ऽकीर्ष्ट** तमो**ऽन्वतप्ता**, स्तोता जनो**ऽतप्त** तपः शमाप ॥३३॥

॥ द्वादशः पादः ॥

*इति हैमव्याकरणकतिपयोदाहरणमयः सर्वजिनस्तवो नवमः ॥*

•

टि० : १. तेन अघं घानिष्यते इत्यर्थः । २. श्वस्तनी ता - विजेष्यते इत्यर्थः । ३. त्वमर्चता पुंसा धीर्वारिषीष्ट । इदं दर्शितेत्यादि ।

श्लो० : २८. सू० ६९ । २९. सू० ६९-७२ । ३०. सू० ७३ । ३१. सू० ७४, ७९, ८१, ८२ । ३२. सू० ८०, ८३-८५, ८७ । ३३. सू० ८८-९१, ९३ ।

## ॥ श्रीसर्वजिनस्तवः ॥

॥ चतुर्थाऽध्यायस्य प्रथमः पादः ॥

**यस्ततान** सुकृतान्यशिश्रियत्, पथ्य**जीगमदघं जिगीषति** ।
साम्य**मार्जिजिषदापिपत्** परं, **नाप्यसूयियिषति** स्तुवे[1] जिनम् ॥१॥

योऽचलाचलमलं **ददाति** शं, **दाश्वद**ङ्गिमुदम[2]ङ्ग**चक्नसः**[3] ।
**ज्ञीप्सु**[4]**रीप्सित**पदं न **धीप्सति**, ब्रह्म **धिप्सति** स **मित्सतु**[5] क्रुधम् ॥२॥

**लिप्सते**[6] शमुरु यस्तवं तवा-**रिप्सतां** स नव **रेधु**रङ्गिनः ।
त्वां विनेमुरिन ! ये च **भेजिरे**, ते न **जेरु**रिह **वेमु**राश्रवम् ॥३॥

**चेरिथ** व्रतमयं च **तेरिथ**, **भ्रेमिथेह** न मदे न **रेजिथ** ।
**ग्रेथिथा**ऽमलगुणान्न **देभिथ**, त्वं भयं **शशरिथेश** ! **देहि** शम् ॥४॥

**दिग्यिरे**ऽङ्गिन इन ! **प्रजिघ्यिरे**[7], निर्वृतौ गिर**मपीप्य**दुत्तमाम् ।
शं **चिकाय** भुवनं **जिघांसतो**-ऽरीन् **जिगाय** च भवान् **जिगीषितान्** ॥५॥

**गुर्वियेष** शमघं **जहौ** मद-**द्रूनुवोष** भुवि **दिद्युते** भवान् ।
**तस्थिवानिन** ! शिवे **चकार** गां, **जागदत्** पथमरीश्च **बेभिदत्** ॥६॥

**सम्पनीपदति** सम्पद**श्नी-कस्यते**ऽस्य भयमीश ! यः क्रमौ ।
**नंनमीति** तव **चञ्चु**रत्तमा, **बम्भजीति** स[8] च **दन्दहीत्य**घम् ॥७॥

संवरे स **वरिवर्त्त्य**घं **चरी-कृत्य** ते तप **इयर्त्ति नेनिजन्**[9] ।
यो **विवक्षति बिभर्त्ति** ते गिरं, स्वं **पिपावयिषते पिपर्त्ति** च ॥८॥

---

टि० : १. तं जिनं स्तुवे इति सम्बन्धः । २. दत्ताङ्गिनां मुत् येन एवंविधं शं यो ददाति । ३. अङ्केन चक्नसो निर्मलः । ४. अन्तर्भूतण्यर्थतया वर्द्धयितुमिच्छुः । ५. 'मींग्श् मींङ्च् वा हिंसायाम्' । ६. प्राप्तुमिच्छति यः । ७. 'हिंट् गतिवृद्ध्योः' । 'योऽनेक०' (२।१।५६) य० । ८. चञ्चूर्यमाणं तमो यस्य स । ९. निर्मलीकुर्वन् ।

श्लो० : १. सू० ४।१।१, ३, ४, ६, ९ । २. सू० १२-१६, १८, २० । ३. सू० २१, २३-२६ । ४. सू० २४-२७, २९-३१ । ५. सू० ३२-३६ । ६. सू० ३७-४२, ४४-४६ । ७. सू० ५०-५४ ८. सू० ५५-६० ।

क्ष्मां **जिजावयिषसीह** सिद्धये-ऽघं **लिलावयिषसि** प्रियं वचः ।
त्वं **रिरावयिषसि** त्वया च **शि-श्रावयिष्यत** इनागमं जनः ॥९॥

त्वं व्यलीभव इनाऽशुभानि **सु-ष्वापयिष्यत** इह त्वया शिवे ।
भु**व्यजीहर**दघं भवान् शमे-ऽत**त्वर**ज्जन**मजीगणत्** समम् ॥१०॥

नैवं **सुष्वपिथ** योगतः क्रमा, **मादिथानशिष** आनृधुर्गुणाः ।
त्वां नतस्य **परिवीय** गां **तवो-वाह** यो न हि स **विव्यथे** स्मरात् ॥११॥

सत्यमूचुरिन ! ते य **ईजिरे**, त्वां प्रवि**द्ध**रु**ड**सू**षुप**न्नघम् ।
जीनरुक् शम ! मुषन्ति **भृष्टभी-र्गृहृणते** च भुवि **सेसिमी**[२]**त्य**मुम् ॥१२॥

त्वां हि वे--ति(?) बुधा **अजूहवन्**, सत्यमार्जव**मशूशवन्** भवान् ।
शं **जुहूषति** **शुशाव** धीश्च **शो-शूयते** तव **शुशावयिष्यते** ॥१३॥

**स्फीत**भाग्य ! दम**पीन** ! ते गुणाः, **पिप्यिरे** भुवि कृपां चिकीर्षसि ।
शीतवाणिर**भिशीन**भीः **प्रशान्**, **शान्त**पृष्टवृष शं **तितांससि** ॥१४॥

**द्यूतजीन**जगदूतिर्नूमद-श्रूतिचूर्णगुणयूतितूर्मणा ।
**प्रश्नपूर्त्ति**कुशल ! त्वया तमो मूर्त्तिरासिजन**जूर्त्ति** **तोर्मणा** ॥१५॥

**शोकमेघ**पवना(नौ)**घपाककृद्**, **योग्यभोग**विरसोऽस्त**भोज्य**धीः ।
प्रा**ज्य**या**ज्यं**[२]पटु**वाच्य**स**द्रुजा-ऽन्युब्ज** ! नाऽऽगसि जिनार्त्तिवीरुधि ॥१६॥

*॥ त्रयोदशः पादः ॥*

॥ चतुर्थाऽध्यायस्य प्रथमः पादः ॥

वर्ष्म **विव्ययिथ** हृद्गिरौ **व्ययं-स्त्रात**विश्व ! भवतो**ऽदिदासत** ।
**स्फार**भीर**विलय** **प्रमाय** शं, काम **आमय** इतो **विलाय** च ॥१७॥

---

टि० : १. स्यमू शब्दे । २. याज्यः सत्कारः ।

श्लो० : ९. सू० ६०, ६१ । १०. सू० ६२-६५, ६७ । ११. सू० ६८-७१, ७८ । १२. सू० ७९-८१, ८४, ८५ । १३. सू० ८७-९० । १४. सू० ९१, ९२, ९४, ९७, १०५, १०७, १०८ । १५. सू० १०३, १०८-११० । १६. सू० १११, ११२, ११७-१२१ । १७. सू० ४/२/१-४, ६, ८, ९ ।

**स्फारयन्** धनुरिषून्नि**चापयन्**, भूभृतं मनसिजो **विलीनयत्** ।
**रोपयन्न**घमजापि देहिनाऽ-**ध्यापितेन** समयं त्वया जिन ! ॥१८॥

**धूनया**ऽघमरतिं **विलापय**, **प्रीणया**ग्र**बलपालयेश** ! माम् ।
मोह उल्बणबलेन **शायये**, **छाययन्** **व्याययती**ह नो यथा ॥१९॥

**पायया**मृततयं च **शातया**-ऽऽनन्द**मर्पय** **विधापय** क्षमाम् ।
**स्फावय** श्रियमघं **घटंघटं**, शर्म मे **घटय** धीर**घाटि** च ॥२०॥

दुःखमाश्व**ज्जरिशं** **जनंजनं**, हृत् त्वया **दमितयामितं** तमः ।
नाथ ! **विज्ञपकवामिता**ऽरते, श्रीरजान्य**शमि** भीर**चाहि** न ॥२१॥

छद्मनाऽग्लपितशं **स्नपं** **स्नपं**, त्वां सुरा **नमित**मस्तका ययुः ।
**ज्वालित**क्षमजनुः क्षणे सित-**च्छत्त्र**युक्त**समपीपदन्** मुदम् ॥२२॥

**नाशशासदवनीमबिभ्रजन्**, किं भवान् कृत**मलीलपत्** प्रभो ! ।
**पथ्यतिष्ठिपद्** **दूषयं**स्तमो-ऽ**चीकृतद्** वृष**मजिघ्रिपज्जनैः** ॥२३॥

मुद् **बभूव** भवभीर**भाजि** शं, **जज्ञ** **इद्ध** ! **दशन** ! त्वयाऽङ्गिनाम् ।
सत्पदेऽघदहनास्पदाद्यत !, त्वं शिवे **रत** ! **सजस्यरागिभिः** ॥२४॥

**जातसात**धन ! **तायते** त्वया, **मुद्विरत्य** रजसो **वितत्य** शम् ।
**तू[1]र्ण**जाव[2]चिदघं **चाखायते** **ह्लन्नलून**मदकर्म! **तीर्ण्ण**वत् ॥२५॥

**भग्न**रोष ! रुग**दून** ! **पून**भीः !, **स्त्यान**पुण्य ! जिन ! **नुन्नवित्त**धीः ।
**क्षीण**(ब)राग ! **कृश**मोह ! **भिन्द्ध्य**घं, **क्षाम** **काम** ! हर कर्म **शाधि** माम् ॥२६॥

---

टि० : १. *'तुर्वै हिंसायाम्' । २. चमू छमू जमू अदने । मन्-वन्-क्वनिप् ततो* हिंसाविनाशि काचित् यस्य सः ।

श्लो० : १८. सू० १०, १२, १४, १५ । १९. सू० १६-१८, २० । २०. सू० २०-२४ । २१. सू० २५, २६, २८-३२ । २२. सू० ३२, ३३, ३५ । २३. सू० ३५-४० । २४. सू० ४३, ४४, ४८-५०, ५४, ५५ । २५. सू० ५६, ५७, ६०, ६२, ६३, ६७-६९ । २६. सू० ६९-७१, ७६-७८, ८०, ८२-८५ ।

**एधि** शं तनु मुदं[१] गिरश्च ते, **सन्तु कुर्युरनयं** च **भिन्दताम्** ।
**कुर्महे** मनसि **तन्म** ईशता, **येऽदि(द्वि)षुः** शिवययुर्न ते व्यमान् ॥२७॥

येऽ**विदुस्तव** वचांस्यऽवारिषुः, **संदधति** मुदमीश ! **शासति** ।
ते **चकासुरजक्षुस्तमो लुन-न्त्यद्भुतं ददति** जाग्रतो वृषे ॥२८॥

**धत्त** ईश ! हृदि यो भवद्गिरं, **निर्मिमीत** इह **चाऽपुनीत** सः ।
स्वं ततो हि **बिभितो**[२] मदस्मरौ, विक्रमं च **जहितो दरिद्रितः** ॥२९॥

मा विभो ! **जहिहि** मां जनन् **पुनन्**, येन[३] **जह्युररयो** न भीः **श्यति** ।
**जायते** च मम साम्य**मिच्छतो, गच्छतः** शमिह जानतः शमम् ॥३०॥

ब्रह्म **पश्य** पथि **तिष्ठ** सद्वचो, **धिन्वदाशृणु** जिनागमं **पिबन्** ।
**क्लाम** मा **मन शमृच्छ शाम्य** भोः, **क्राम दाम्य** युजि **यच्छ सीदताम्** ॥३१॥

त्वां **नमामि** जिन ! तं **वितन्वते**, यद्गुणाः प्रमदम**त्यशेरत** ।
**क्ष्माप वेद विदतुर्विदुर्न**यान्, वासवो गुरुकवी सुरा बहून् ॥३२॥

**संविद्रते** ये तव गां **तयाहु-र्नेच्छेत्** क्रुधीर्**नाह दधौ भजेयम्** ।
ये त्वां **नुवेयुर्**जिन ! **रक्षतात्**तान्, यदि **श्रयेत्** द्युशिवे **त्वरेताम्** ॥३३॥

॥ चतुर्दशः पादः ॥

*इति हैमव्याकरणकतिपयोदाहरणमयः सर्वजिनस्तवो दशमः ॥*

•

---

टि० : १. सौख्याय भवः । अव्ययत्वाच्चतुर्थी लोपः । सौख्याय मुद् । २. तस् तस् तस् । ३. कारणेन ।

श्लो० : २७. सू० ८४, ८६, -९१ । २८. सू० ९२-९६ । २९. सू० ९७-१०० । ३०. सू० १०१-१०६ । ३१. सू० १०८-१११ । ३२. सू० ११३-११५, ११७ । ३३. सू० ११६, ११८-१२१, १२३ ।

## ॥ श्रीसर्वजिनसाधारणस्तवः ॥

॥ चतुर्थाऽध्यायस्य तृतीयः पादः ॥

सिद्धिं **करोति** स्म **वृणोति वेत्ति**, साम्ये**ऽसरज्जागरितः** शमे यः ।
तत्त्वान्य**दर्शत्** प्रणुता जिनं तं, **सञ्चस्करुः** क्ष्मां नर **ऐयरुः** शम् ॥१॥

**तेरु**र्भवं ते तव **सस्मरुर्ये**, **सास्मर्यते**ऽभूद्विरतो य इष्टम् ।
तेना**ऽर्यते** सन्नय **चेच्यते**ऽहं, **स्मर्यासम**ऽर्यासमृतं **सुवै** च ॥२॥

स्वं **नेनिजानिं**[१] त्वयि नाथ ! **जुह्व-दयानि** शं मे दुरितानि **यन्तु** ।
स्तुवन्ति ये त्वा **कुटितार** ईशा-**ऽधियन्ति** भोगोद्विजिताऽवतांस्त्वम् ॥३॥

कीर्त्या दिशः **प्रोर्ण्णुविता** भवान् यै-**र्निन्ये** मनः **सस्वजिरे** गुणैस्ते ।
**भङ्क्त्वा** मदं सत्तपसा **कृशित्वा**, सदा **मृषित्वा** च शिरोलु**चित्वा** ॥४॥

नुतिं **ग्रथित्वा** तव गां **लिखित्वा**, **चिचेतिषन्तः** सुतरां **मुदित्वा** ।
**प्रद्योतिता** येन च **शोचितं** यै-स्ते**ऽधर्षिताः** स्युः **पविता** गुणैश्च ॥५॥

**प्रस्वेदितं** ते न वपुर्मदं **चो-षित्वा** भृशं **मर्षितवान्** **क्षुधित्वा** ।
**स्कन्त्वा**[२] समत्वं शठतां **मृदित्वो-षित्वा** शमे तत्त्वमभा **विदित्वा** ॥६॥

तमो मुषित्वा **विविदिष्यते** यैः, **पृष्ट्वा जिघृक्ष्येत** विभो ! वचस्ते ।
तेऽघं **जिगीषन्ति** शमं **गृहीत्वा**, मोहं **बिभित्सन्ति सुषुप्सितो**[३]ऽहम् ॥७॥

**भित्सीष्ट** कष्टं स भवान् **कृषीष्ट**, सुखं सदा मे हृदि **सङ्गसीष्ट** ।
यः सर्वतोऽबुद्ध तमोऽहृतोऽह-**मुपायतेष्टं व्यधितादित** द्याम् ॥८॥

**मार्ष्टा** मदं दोषभरं **न्यकार्षीः**, कर्माण्यभि(भै)त्सीः सुकृतान्य**भाणीः** ।
**अजागरी**र्ध्यानकृते**ऽशसीस्त्वं**, तमांस्य**वादीः** शिव**मग्रहीच्च** ॥९॥

---

टि० : १. स्वं त्वयि जुह्वत् ददत् नेनिजानि निर्मलं करौ वे । २. गत्वा । ३. शायितुमिष्टं अहो येन मोहेन स तम् ।

श्लो० : १. ४।३।१-४, ६-८ । २. सू० ८-१३ । ३. सू० १४-१८ । ४. सू० १९, २१-२४ । ५. सू० २४-२७ । ६. सू० २७, २८, ३०-३२ । ७. सू० ३२-३४ । ८. सू० ३५-३७, ४०, ४१ । ९. सू० ४२, ४४, ४५, ४८, ४९ ।

सद्वाद शं **दायक** ! द्वारकार्त्ते- ब्रह्मण्य**जागारि** जिन ! त्वयारम् ।
**अदायि** मुद्धीरवधीतजन्ये-नोऽ**जन्यरोषा**ऽ**शमि कामदायिन्** ॥१०॥

**अगामि धीकामुक** ! शं **शमाढ्या-विश्रामयामोद्यम**साधुनाम ।
त्वया गिरं ते **निनयेश ! नौमि, ब्रवीमि पापेमि तृणेह्मि**-- ॥११॥

**स्तवीमि** तं त्वां जिन ! यस्य **भाऽऽसी-द्दीप्रा** विलासीच्च जनो वचो**ऽपात्** ।
**अधात्** सुरौघो**ऽतत** हृद्य**साथा:**, शं यो रजो**ऽशाश्च** भया**न्यभित्था:** ॥१२॥

तमो**ऽलविध्वं** सदयो**ऽसि** कर्मा-**ऽभिनो**ऽ**चकाद्य**स्तव गाम**लीढ** ।
**न्यगूढ** योगान्न हि सो**ऽदरिद्रीत्**, सु**चेतन: सङ्कथिता**मृताध्वन् ॥१३॥

क्ष्मां **तारयामास** भवान**वात्सीत्**, मुक्ता**वजय्यं प्रशमय्य** कर्म ।
**अक्षय्यशर्मस्पृहयालु**रंह:, **प्रक्षीय** तेऽयात् **स्तनयित्नु**नाद ! ॥१४॥

मोहो **दिदीये** त्वदगुस्तमांसि, **ग्लेयाद**घं ये च गिरोऽदधस्ते ।
शिवं **ययुस्ते ददिथे** हितं मे, **स्थेया** हृदि त्वं समतां च **देया:** ॥१५॥

**जेगीयसे** तत्त्वमलिव्रजस्ते, **जेघ्रीयते**ऽङ्गं जिन ! **पीयते** वाक् ।
सुरै रजो**घातक** ! **घात**हीन !, **जेघ्नीयते**ऽघं च **जघान** नन्ता ॥१६॥

तत्त्वा**न्यवोचस्त्वमपास्थ** एन-स्त्वद्भीर**नेशद्** दिवि चैष **शेते** ।
**शाशय्यते** श्रेयसि येन ते वाक्, **समुह्यते** धी**रुदियात्** प्रसादात् ॥१७॥

त्वं **नूयसे** रुग्भिरिनायसे च, **चेचीयसे** पुण्यमिहान**सूयन्** ।
**जीया:** शुचीभूतचरित्र**नेत्री-यसे** च **पित्रीभवसि** त्रिलोक्याम् ॥१८॥

---

टि० : १. गतसंग्रामेन ।

श्लो० : १०. सू० ५०, ५२-५५ । ११. सू० ५५-५९, ६२-६४ । १२. सू० ६४-७० । १३. सू० ७२-७४, ७६, ७८, ७९, ८२, ८३ । १४. सू० ८५, ८६, ८९, ९०, ९२ । १५. सू० ९३-९६ । १६. सू० ९७-१०१ । १७. सू० १०२-१०७ । १८. सू० १०८, १०९ ।

**चेक्रीयसे** मोहवधं **ह्रिया** मे, दुःखं दया मा **द्रियसे** क्षमीयन् ।
त्वया धृतिः **स्वीक्रियतेऽदधिस्यन्, व्युदन्यचित्तेष्वरसाशनाय**[1] ॥१९॥

॥ पञ्चदशः पादः ॥

॥ चतुर्थाऽध्यायस्य चतुर्थः पादः ॥

तत्त्वानि **भव्येषु** भवान**वोचद्**, भक्ति**प्रवेये** नृ**समाज**पूज्य ! ।
**प्रत्ता**ऽङ्घ्रिमुद्धर्मरथे **प्रवेता-ऽऽचख्ये** शिवं संसृतिमाख्यते सः ॥२०॥

**नीत्तेष्टवीत्ता**मृत आत्तसाम्य !, **सुदत्त**धर्मा**ऽदितशं स्थितो**ऽसि ।
**हित्वा** ममत्वं **विहिता**मृतश्री-**श्छिता**ऽघ**जग्धक्रु**ध**शुद्धघास** ॥२१॥

ये त्वद्गुणानूयुरघं विदद्रु-र्मदं **विशश्रुः पपरुः** क्षमां ते ।
**वध्या** भयं निर्वृति**मध्यगा**स्त्वं, **कर्मावधीश्चा**रु जिगांस्यते शम् ॥२२॥

तवागमं **योऽधिजिगांसतेऽधि-जगेऽन्यमध्यापिपदध्यगीष्ट** ।
नार्हन् कुशास्त्रं भवहेतुमात्रा-**ऽध्यजीगपच्चाभवद्**त्तमोऽयम् ॥२३॥

आसन्नता ये त्वयि ते **शमाय-न्नैच्छन्** गुणान्नारिषुरापदं च ।
**अवारिषुः शान्तिमशस्त्र हस्ते**-हाऽऽ**स्से वरीतुं निगृहीतिमर्त्तेः** ॥२४॥

भवं **तरीताऽवरिषीष्ट** शंसो-**ऽवरिष्ट** यस्ते गिर**मास्तरिष्ट** ।
स्वं **गोपिता** साधुगुणै**रधोता**, तेना**जरित्वा स्मरिषीष्ट** तत्रम् ॥२५॥

मनोदमित्वा**ऽञ्चितवान् पवित्वा**, यस्त्वां **क्लिशित्वा क्षुधितोऽर्त्तिसोढा** ।
**शिश्रीषते**ऽघं **तितरीषती**ह, **शिवैषिता** शं **विवरीषते** तम् ॥२६॥

---

टि० : १. विगता उदन्या तृष्णा यस्य स वि० । चित्तेषु । न विद्यते रसेषु अशनाया क्षुधा यस्य । २. 'शास्त्यसू-वक्ति-ख्यातेरङ्' (३।४।६०) अङ्प्र० ।

श्लो० : १९. सू० १०९-१११, ११३, ११५ । २०. सू० ४।४।१-३, ५, ७ । २१. सू० ८, १०-१२, १५-१७ । २२. सू० १९-२३ । २३. सू० २५-२९ । २४. सू० ३०-३५ । २५. सू० ३५-३८, ४१ । २६. सू० ४२-४७ ॥

भवे न **पित्सेद्** **यियविष्यते** स, श्रिया रिरिष्येत धिया च दोषान् ।
**हनिष्यतीर्ष्यां** च **हरिष्यते** यः, **पिपृच्छिषेत्** त्वाऽ**शिशिषेत** मार्गम् ॥२७॥

विष्वग्यशो **नर्त्स्यति** तस्य सोऽर्त्ति, **कर्त्तिष्यती**हाशु **गमिष्यती**ष्टम् ।
**निवर्त्स्यति प्रक्रमितुं** शिवेऽघात्, कर्त्ता शमं धीवृत ! यः **श्रित**स्त्वाम् ॥२८॥

दयायुत**स्वान्तं नुनूषति** त्वां, **तितिक्षते** यो **निजुघुक्षते**ऽङ्गम् ।
**अभ्यर्ण्ण**मोक्षो **दृढकष्टदान्त** ! सोऽ**त्रस्त** ! गुप्तेन्द्रिय ! **वान्त**दोष ! ॥२९॥

अमूर्त्त ! लम्भार्जव ! **बाढशान्ता-ऽघध्वान्त** ! **पूर्णो**हित ! **जप्त** तत्वा(त्त्व?) ।
अरुष्ट **हृष्टेश** ! **ददर्शिथ** क्ष्मां, **पपाथ** शं **भेजिथ** वा **चकर्थ** ॥३०॥

दुःत्रोथ(दुद्रोथ) धामाऽऽरिथ शं नतास्त्वां, शीर्षं च **सञ्चस्करिमा**ऽ**दिवांसः** ।
मुदं वृषं **चिच्यिमहे** गिरं ते-ऽ**नंसिष्म** भाग्या**दवजग्मिवांसः** ॥३१॥

य इह **विविदिवांस**स्तत्त्व**मस्ताविषु**स्त्वां,
स्वमिन ! **ददृशिवांस**स्ते **जघन्वांस** एनः ।
गिरम**भिदधिवांस**स्ते ध्यानतो **नाऽस्वपीद्** यः,
**स्वपिति** दिवि शमा**दत्सो**ऽवितुं **चेशिषे** तम् ॥३२॥

क्ष्मां **संस्करोषि** स्व**मुपस्करोषि**, वृत्तेन **धीलम्भक** ! **शुम्भ नन्द** ।
मोहाऽ**प्रतिस्कीर्ण्ण विमुञ्चमानो-ऽनारम्भ** रन्धोरगविष्किरेश ! ॥३३॥

**लम्भं लम्भं** त्वद्गिरः **क्ष्मोपलम्भ्या**, श्रेयो**लम्भ्या**ऽऽनन्दथुः **सूपलम्भः** ।
स त्वै **स्त्रष्टा** ते नमः सङ्गनंष्टा, **द्रष्टा** तत्त्वं मा भवाब्धौ न **मङ्क्ता** ॥३४॥

**त्रप्ता** जनस्तीर्थकरं नमंस्त्वां, **स्त्रप्ता** शमं **स्प्रष्टा कृषीष्ट** मार्गम् ।
श्री**शोभमानं** भवमीश ! **तीर्त्वा-ऽऽसीनः** समाधौ **किरतीह** कर्म ॥३५॥

---

श्लो० : २७. सू० ४७-४९ । २८. सू० ५०, ५१, ५३, ५५, ५७ । २९. सू० ५८-६१, ६४, ६७, ६९, ७०, ७४, ७५ । ३०. सू० ७०, ७४-७६, ७८, ७९ । ३१. सू० ८०, ८१, ८३, ८६ । ३२. सू० ८२, ८३, ८५, ८७-८९ । ३३. सू० ९१, ९२, ९४, ९६, ९८, ९९, १०१-१०३ । ३४. सू० ९८, १०५, १०६, १०८, ११०, १११ । ३५. सू० ११२, ११४-११६ ।

यस्ते गुणान् **कीर्त्तयतीति** सिद्धिं, **वुवूर्षते**ऽसाव**शिष**च्च मोहम् ।
न तेन **शिष्येत** जिन ! द्युकान्ता-स्तं **क्नोपयन्ति** प्रथिताऽऽ**शिषो**ऽथ ॥३६॥

॥ षोडशः पादः ॥

*इति हैमव्याकरणकतिपयोदाहरणमयः सर्वजिनसाधारणस्तव एकादशः ।*

यस्य लक्षणसूत्राणि, जिह्वाग्रे सन्ति जाग्रति ।
स्फुरद्रूपस्तदर्थश्च, स्तवानेतान् स पश्यतु ॥१॥

कृतिरियं वाचनाचार्यशीलशेखरगणिपादानाम् ॥ छ ॥
भद्रमस्तु श्रीसङ्घायेति ॥

---

श्लो० : ३६. सू० ११७, ११८, १२०-१२२ ।

# महोपाध्याय श्रीसोमविजयगणिविरचिता संस्कृतगेयपञ्चस्तवी ।।

– सं. विजयशीलचन्द्रसूरि

उपाध्याय सोमविजयगणि ए १७मा सैकाना महान जैनाचार्य जगद्गुरु हीरविजयसूरि महाराजना अत्यन्त प्रीति-विश्वासभाजन शिष्य हता, तेवा उल्लेखो अनेक रीते जोवा मळे छे, परन्तु तेमनी विद्वत्ता विषे खास कांइ जाणवा नथी मळतुं. उपाध्यायनी पदवी अमस्ती तो न ज मळी होय, एटले तेओ पण, तेमना समकालीन अन्य उपाध्यायोनी जेम ज, विद्वत्ता अने पाण्डित्यना स्वामी हशे ज. तेनो एक आछो अंदाज, अहीं प्रगट थई रहेली, तेमनी पांच संस्कृत गेय भक्ति-रचनाओ द्वारा मळे छे.

शुद्ध देशी ढाळोमां गवाती गुर्जर रचनाओ जेवी ज गेय रचनाओ, ते पण संस्कृत भाषाना बधां नियम-नियन्त्रणो जाळवीने, अक्षर तथा मात्रानो सुमेळ साचवीने रचवानुं काम सरल नथी. व्याकरण-काव्य-कोश आदि हस्तगत होय, रजूआतमां सहज माधुर्य तथा प्रसाद आणवानी सक्षम प्रतिभा होय, त्यारे ज आवी सरस रचनाओ शक्य बने छे. आ स्तवनो जोईशुं तो ख्याल आवशे के क्यांय शब्दो के मात्राओ के भावो मेळववा जतां खेंचताण नथी करवी पडी; क्यांय कोई पंक्ति कष्टथी के श्रमथी साध्य नहि जणाय; बधुं भीतरथी अनायासे ज, सहजताथी ज, फूटी आवतुं अनुभवाय.

आ उपाध्यायजीनी अन्य कोई रचना होवानुं के प्रगट थई होवानुं प्रायः जाणमां नथी. ते जोतां तेमनी आ रचनाओ प्रथम वखत प्राप्त थई छे. आ रचनाओ शोधीने प्रकाशमां लाववानो यश मित्र अने कविवर्य मुनिराज श्रीधुरन्धरविजयजीने घटे छे. तेमना निजी संग्रहगत, २ पानांनी, सम्भवतः कर्ताना हस्ते लखायेली प्रतिना आधारे आ पांच गेय कृतिओ अहीं मुद्रित थई रही छे, आ माटे आपणे तेओना ऋणी रहीशुं.

कर्तानो समय १७मो सैको छे ते स्पष्ट छे.

•

महोपाध्याय-श्रीसोमविजयगणिविरचिता

# संस्कृत-गेय-पञ्चस्तवी

(१)

श्रीगुरुपदकमलं निजे, मानससरसि निधाय रे
श्रीजिनवीरमहं नुवे, भविजनसङ्घशिवाय रे ॥
शिवशान्तिकारकचलननलिनं कमलकोमलकरतलं
केवलालोकविलोकिताखिलनाकमर्त्यरसातलम् ।
संसारसागरपारगामी त्वमसि वीरविभो ! यथा
तदपारपारावारतरणे स्यामलं मम कुरु तथा ॥१॥
देहि विभो ! मम शिवपदं, त्वं करुणारससिन्धो ! ।
भवभयनीतिमतो यते(तेः), समजगतीजनबन्धो ! ॥
बन्धुवदमरशूलपाणे रोषदोषनिवारको
विकटदृष्टिविषोऽपि भोगी कौशिकोऽमरनायको(कः) ।
भवता कृतो जिनराज ! पीडाऽतीव सोढा सुरकृता
अपराधवत्यपि सङ्गमे जिन ! कृपादृष्टिरुदीरिता ॥२॥
मोहमहीधरकरगतं मामुद्धर जिन ! वीर ! रे
हेतुमृते हितकारको मेरुमहीधरधीर ! रे ॥
धीरिमादिगुणौघबन्धुर-गतिजितामरसिन्धुरो
विकटसंकटकोटिकारकवामकाममुधाकरो(रः) ।
मयि किङ्करे कुरु भूरिकरुणामिह भवेऽपि भवान्तरे
त्वमकारि जगदुपकारविधये वेधसा भुवनोदरे ॥३॥
यदि मम मानसमन्दिरे वस सलवं जिन वीर ! रे
अहमतरं भवसागरे लब्धभवोदधितीर ! रे ॥
भवतीरदायक ! योगिनायक ! जन्तुतायक ! शुभविधे !
समभीतिवारक ! भुवनतारक ! शान्तिकारक ! शमनिधे ! ।
हरिहरसुरासुरवशीकारककामकुञ्जरकेसरी(रिन् !)
करवाणि तावकवाणिमनिशं कुरु तथा भवतरुकरी(रिन् !) ॥४॥

यदि मम मानसमानसे क्षणमपि हंससि देव ! रे
किं बहुना तपसा तदा सुरनरपतिसकृतसेव ! रे ॥
सेवासु हेवाकिनो जीवा लभन्ते शिवसम्पदं
किमु भविकलोका ! विगतशोका ! भजत नो गुणसम्पदम् ?।
मम भवतु देव ! सदैव सेवकपावनं तव शासनं
तथा **श्रीगुरुहीरसूरे**रपरमिह किमु याचनम् ! ॥५॥
इति श्रीमहावीरस्तवनम् ॥

(२)

त्रिशलासुत! रे वाञ्छितफलमन्दार! रे
हरिपूजित! रे करुणामृतभृङ्गार! रे
जनजीवन! रे त्रिभुवनजनताधार! रे
नतसुरनर! रे गतभवपारावार! रे ॥
भववारपारावारतरणे देव ! शरणं देहि मे
श्रीवीरजिनवर ! भुवनहितकर ! रुचिरसूरो हि स हि मे (?) ।
संसारकारागारपतितं मोहराजवशीकृतं
मां मोचयाऽऽशु जिनेश ! तावकसेवकं शरणागतम् ॥१॥
गतदूषण! रे त्रिभुवनभूषण! वीर! रे
सुखसागर! रे मेरुमहीधरधीर! रे
समताकर! रे मारदवानलनीर! रे
ममताहर! रे आसादितभवतीर! रे ॥
भवतीरयायी भुवनपायी पाहि पाहि कृपानिधे !
भवरूपकूपादतिविरूपादीश ! साधितशुभविधे ! ।
भविकामितामितसिद्धिदाने त्वमसि दैवततरुनिभो
निजचलननलिने लीनमनिशं मानसं मम कुरु विभो ! ॥२॥
विकराले रे कलिकाले तव शासनं
जिन ! लेभे रे कथमपि भवभयनाशनम् ।
मम कुरु कुरु रे सौवगिरा मतिवासनं
मा पुनरपि रे भवतु मनोभवपाशनम् ॥

मनोभवभवपाशनं मेऽनन्तशोऽजनि जिनपते !
तदभावकरणे देव ! शरणे समेतोऽहं शुभमते ! ।
अथ यथोचितकरणचतुरे नाथ ! किं कथनेन मे ?
तथा कुरु न भवन्ति रोषादयो दोषा मयि समे ॥३॥
करुणापर! रे नागरवन्दितपाद! रे
भविराशे रे नाशितसकलविषाद! रे ।
जिनपुङ्गव! रे विदलितवादिविवाद! रे
निजवचसा रे विफलितवीणानाद! रे ॥
तव नादलीना देवदानवमानवा विकचानना
आयान्ति पातुं भावपीना दोषहीना देशनाम् ।
तथा छागमृगारिवारणवाजिराजिमुखा घना
बहुजातिवैरविनाशकरणे समवसरणे ते सना ॥४॥
त्वयि गतवति रेऽमितसुखसंगतशिवपुरे
दीपाले रे दिवसे देव ! शिवङ्करे ।
संजाते रे भारतनरि विरहातुरे
कथमेवं रे समता गुणमणिसागरे ॥
गुणसागरे जिन ! कथं समता शिवे नाथ ! तथा भवे ?
समताधरो जिनराजवीरो भवन्तं इति किमु नुवे ? ।
अथ विरहवारणकृते सौवं सेवनं दिश यतिपते !
**श्रीहीरविजयमुनीश**शिशुना नुतो वीरो हितकृते ॥५॥

*इति श्रीवीरस्तवनम् ॥*

(३)

चेतन ! कुरु सीमन्धरशरणं, भवसागरतरणे वरकरणम् ।
यदि तव भाति भयङ्करमरणं, किं बहु विलपसि मूढ ! सकरुणम्? ॥१॥ चेतन०
संप्रति काले यानसमानो, राजति सीमन्धरभगवानो ।
मनुजभवो नहि पुनरपि सुलभो, निजहितसाधनमिति कुरु भो भोः ! ॥२॥ चेतन०
शरणागतमङ्के निजबालं, मामव भवतो भूगतभालम् ।
त्वमसि विभो ! करुणारससिन्धो !, समजनसुखदोऽकारणबन्धो ! ॥३॥ चेतन०

संयमयोगाकरणविगानो, भवसागरपतितो जिनभानो ! ।
संप्रति तव पदसेवनलीनो, मां किमु पारग ! तारयसे नो ? ॥४॥ चेतन०
तव पदपङ्कजभजनविहीना, भवमटन्ति मनुजा अतिदीनाः ।
ये पुनरनिशं सेवनलीनाः, ते भवन्ति सुखसागरमीनाः ॥५॥ चेतन०
मां विधेहि निजसेवालीनं, सीमन्धर ! भवसङ्गतिदीनम् ।
नैव समीहे सुरनरभोगं, किन्तु विभो ! तव सेवनयोगम् ॥६॥ चेतन०
चेतन ! कुरु सीमन्धरशरणम् ॥
इति सीमन्धरजिनवरशरणं ये सततं विरचन्ति
जातिजरामृतिसन्ततिभीतिं ते भविका न करन्ति ।
मुनिजनचरिताराधनविषये निजचेतसि विकसन्ति
**श्रीहीरविजयसूरीश**विनेयो वदति शिवे निवसन्ति ॥७॥

*इति श्री सीमन्धरस्वामिस्तवनम् ॥*

(४)

श्रीगुरुचरणमुदारं, स्मारं स्मारं स्वमानसे भक्त्या ।
मेरुमहीधरधीरं, वीरं नुतिगोचरीकुर्वे ॥१॥
केवलकमलालीलागारं, शमदमगुणमणिपारावारम् ।
भविजनवाञ्छितफलमन्दारं, वन्दे श्रीजिनवीरमुदारम् ॥२॥
भववनगहने निशितकुठारं, भरतभूमिललनागलहारम् ।
मुनिमरालकोटीकासारं, वन्दे० ॥ ॥३॥
मदनदवानलविपुलासारं, त्रिभुवनजनतावरशृङ्गारम् ।
उपशमरसभरभृतभृङ्गारं, वन्दे० ॥ ॥४॥
हेलाटालितमारविकारं, भवकूपे पतातामाधारम् ।
रूपाकम्पितकमनाकारं, वन्दे० ॥ ॥५॥
भविककोटिकृतभवनिस्तारं, त्रिजगति विकसितगुणविस्तारम् ।
कृतिततिमानसशुकसहकारं, वन्दे० ॥ ॥६॥
काञ्चनकजकृतपादविहारं, सुरनरशंसितगुणसम्भारम् ।
समजनलोचनसुखदातारं, वन्दे० ॥ ॥७॥

भविजनवारं तारं तारं, सिद्धिमितो(तं?) दितपुनरवतारम् ।
हृदि निधाय तं वारंवारं, वन्दे० ॥ ॥८॥
एवं जिनकोटीरो, विनुतो रागादिजित्वरो वीरः ।
**श्रीहीरविजयसूरेः** शिष्येण शिवप्रदो भूयात् ॥ ॥९॥

*इति श्रीवीरस्तोत्रम् ॥*

(५)

स्वस्ति श्रीदातारं, ज्ञातारं विश्ववस्तुनः सारम् ।
नतसुरनरनेतारं, नवीमि वीरं शमागारम् ॥१॥
जयति सदा जिननायकवीरो, जिनमतभासनभानु रे ।
केवलकमलालीलावासो, धीरतया गिरिसानु रे ॥१॥ जयति सदा० ॥
त्वमसि विभो ! भवपारावारे, भविजनतारणसेतु रे ।
ज्ञातकुलावासेऽमलभूषा-करणे बन्धुरकेतु रे ॥२॥ ज० ॥
देहि विधेराराधनमनघं, संयमविषये देव ! रे ।
शिवगतिसङ्गतिसाधनमनिशं, सुरनरपतिकृतसेव ! रे ॥३॥ ज० ॥
त्वमसि पिता माता मम नेता, कामितदाता वीर ! रे ।
वितर विभो ! निजचरणे वासं, काञ्चनगौरशरीर ! रे ॥४॥ ज० ॥
अशोकतरुतलमणिसिंहासन-आसीने जिनराजि रे ।
आतपवारण-चामर-दुन्दुभि-भासुरभूतिविराजि रे ॥५॥ ज० ॥
कुसुमनिकर-भामण्डलभासति, भविकजना विकसन्ति रे ।
वीणानादविनादितलोके, के समुदो न भवन्ति ? रे ॥६॥ ज० ॥
जिन ! तव सेवालीनं लोकं, समकमला विलसन्ति रे ।
जगदुपकारे जिनपविहारे, ईतिगणा न भवन्ति रे ॥७॥ ज० ॥
चिदानन्दरूपे त्वयि नाथे किमु मयि ननु भवभीति ? रे ।
करुणारत ! शरणागतवत्सल !, नैवं भवतो रीति रे ॥८॥ ज० ॥
नो विफला विमला जिन सेवा, मा भव विधुरो धीर ! रे ।
एवं सातकृते मम वचनं, देहि कृपापर ! वीर ! रे ॥९॥ ज० ॥
एवं त्रिभुवनजनता-नेता विनुतो जिनाधिपो वीरः ।
**श्रीहीरविजयसूरेः** शिशुना सङ्घस्य भद्रकृते ॥१०॥

*इति श्रीमहावीरस्तोत्रं, कृतं **महोपाध्याय श्रीसोमविजयगणिभिः** ॥*

# एक संस्कृत स्तुति

**– सं. विजयशीलचन्द्रसूरि**

आ शङ्खेश्वरपार्श्वनाथनी स्तुति छे. गुजरातीमां 'थोय' तरीके ओळखाती तथा धर्मक्रियामां बोलाती ते रचना छे. जैनोमां प्रसिद्ध 'वरस दिवसमां अषाढ चोमास, तेमां वळी भादरवो मास, आठ दिवस अति खास' आ तथा आवी थोयोना ढाळमां रचायेली आ संस्कृत थोय छे. आवी रचना प्रायः प्रथमवार जोवा मळी छे. थोयनां बधां लक्षणो आमां जोवा मळे छे.

समासप्रचुर, प्रासमधुर अने पाण्डित्यदर्शक आ रचना कवि कान्तिविजयजी नामना कवि-साधुए करी छे. तेमना गुरुनुं नाम प्रेमविजयजी छे. १८मा शतकना ते कवि छे. तेमनी गुजराती गेय भक्ति-रचनाओ जैनो खूब गाय छे. तेमनी रचनाओ अत्यन्त भाववाही अने भक्तिमय होय छे. तेओ संस्कृतमां पण आवी विलक्षण अने प्रगल्भ रचना करी शकता हशे ते तो आ थोय जोई त्यारे ज ख्याल आव्यो.

आ रचनाना प्रकीर्ण पत्रनी जेरोक्स मुनिश्रीधुरन्धरविजयजीए आपी छे. तेमनो आभारी छुं.

'थोय' ना पत्रमां छेवटे व्याकरणने तथा न्यायने लगती अभ्यासनोंध हती. ते पण यथातथ, थोयनी साथे ज – पाछळ प्रगट करवामां आवे छे. जो थोयनुं पानुं कर्ताए पोते ज लख्युं होय तो, आ अभ्यासनोंध तेमना विशद बोधनी साहेदी आपी जाय छे.

•

स्वस्ति श्रीकुलगृहमभिराम -- प्रकटोद्धुरगुणमणिगणधाम स्ववशहृषीकग्रामः,
योऽगमदव्ययपदमतिवाम-प्रकृतिमदाद्रिभिदात्याधामस्तर्जितदुर्जयकामः ।
निष्ठितमोहमहासंग्रामः कृतसमुदञ्चत्प्रतिघाचामः कल्पितशोकविरामः,
भक्त्युल्लसदाशयसूत्राम-प्रमुखस्तुतसितकीर्त्युद्दामस्तं पार्श्वं प्रणमामः ॥१॥

अविनश्वरसुखभूरुत्ताला-यतदुरितागवि दरजलबाला परममहोदयशाला-
ऽविघ्नवती नवदहनज्वाला-शोषितकलुषविषयजम्बाला रचिताऽजन्योच्चाला ।
प्रत्यादिष्टभवभ्रमिफाला ज्ञानादर्शफलत्समकाला शमितकषायाङ्गाला,
चरणप्रणमदमरनरपाला त्रिजगज्जाग्रद्वचनरसाला वन्द्याऽसौ जिनमाला ॥२॥

नवरसपूरसुधासन्धान-प्रसरन्नवतत्त्वीविज्ञान-व्यतिकरनूत्नप्रतानः,
सुकृतविटपरचनाद्यसमानः कोविदमधुकररचितोद्गानः कृतसुमनःसम्मानः ।
दारिद्र्योद्धरणाद्यवदान-प्रस्तुतचित्रपवित्रविधानः स्थितिमुच्चैर्लभमानः,
चारित्रामोदं विदधानः स जयति सिद्धिफलं चिन्वानः श्रीप्रवचनसन्तानः ॥३॥
कोमलतनुभासा विकचानि च्छलयन्ती श्यामलकमलानि प्रथितारिष्टज्यानिः,
धरणीधरदयिता सकलानि व्यथयन्ती प्रतिपक्षकुलानि क्षपितागाधम्लानिः ।
**श्रीशङ्खेश्वरपार्श्व**पदानि ध्यायन्ती विदलितपापानि **प्रेमविजय**सुखदानि,
**पद्मावत्य**भिधा विपुलानि प्रदिशतु सा देवी सुखखानिः **कान्तिविजय**कुशलानि ॥४॥

*इति शङ्खेश्वरपार्श्वनाथस्तुतिः समाप्तेति ॥*

•

सोपसर्गोऽन्यार्थवृत्ति-रन्तर्भूतक्रियान्तरः ।
णिगर्थोऽन्तर्णिगर्थो वा, पञ्चोपायैः सकर्मकः ॥१॥

फल-व्यापारयोरेक-निष्ठतायामकर्मकः ।
धातुस्तयोर्द्धर्मिभेदे, सकर्मक उदाहृतः ॥२॥

'देवदत्तः पचती'त्यत्रौदनविक्लित्त्यादिकं फलं फूत्कृत्यग्निसमिच्चालनादिना व्यापारेणैकनिष्ठं विवक्ष्यते इत्यकर्मता ।

विवक्षातः कारकविभक्तयो नाना भवन्तीति शाब्दिकाः । अत एव 'आत्मानमात्मना वेत्ती'त्यादौ तृतीया ।

साध्यतावच्छेदकसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणभूतं यत्प्रतियोगिताश्रयं सद् हेतुतावच्छेदकसम्बन्धेन हेतुत्वावच्छेदकावच्छिन्नहेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकतानवच्छेदकसाध्यसामानधिकरण्यं हेतोर्व्याप्तिः ॥

# बे संस्कृत पत्रो

– सं. उपा. भुवनचन्द्र

जैन श्वे० श्रमणसङ्घ तथा श्रावकसङ्घनी छेल्ला ३००-४०० वर्षनी गतिविधि-स्थितिनी झांखी करावता बे संस्कृत पत्र संकलित करीने अहीं रजू कर्या छे. प्रथम पत्र नागोरी वडतपगच्छना (पार्श्वचंद्रगच्छना) श्रीपूज्य भट्टारक श्रीविवेकचन्द्रसूरि (वि.सं. १८३७मां आचार्य पद) उपर लखायेलो छे. लांबा विज्ञप्तिपत्रना प्रारम्भना श्लोको ज छे. ऊतारो अपूर्ण रह्यो छे. पत्रमां लखनार साधुनी प्रौढ प्रतिभा तरवरी रहे छे.

बीजो पत्र खम्भातथी भट्टारक विद्यासागरसूरि तरफथी मुन्द्रानगरमां चातुर्मास रहेल श्रीवृद्धिसागर गणि ऊपर लखायेलो छे. साधुओ गच्छाधिपतिने क्षमापनापत्र / विज्ञप्तिपत्र लखता, तेमां पर्युषण, चातुर्मास सम्बन्धी वृत्तान्तनिवेदन करता. श्रीपूज्य भट्टारक वलता पत्रमां पोताने त्यांनो वृत्तान्त लखता. पत्र अने तेना उत्तर उत्कृष्ट संस्कृत भाषामां, काव्यमय आलङ्कारिक भाषामां लखाता. प्रस्तुत पत्र आवो ज एक प्रत्युत्तर पत्र छे. पत्रमां संवत्नो उल्लेख नथी, परन्तु पत्र पूरो थया बाद, खाली जगामां, अन्य हस्ताक्षरमां बीजो पत्र छे अने तेमां १७८१नो उल्लेख छे, तेथी आ पत्र एनाथी पूर्वनो (संभवत: १७८०नो) छे एवुं तारवी शकाय छे.

श्रमणोनी गुरुभक्ति, संस्कृतभाषा परनुं प्रभुत्व, श्रावकोनी श्रद्धा, चातुर्मास / पर्युषणनी तत्कालीन परिपाटी, श्रमणोनी आन्तरिक व्यवस्था वगेरे तथ्यो आवा पत्रोमांथी सांपडे छे. पर्युषणना वृत्तान्तमां स्वप्नदर्शननी के अन्य उछामणीओनो उल्लेख नथी. बन्ने पत्रो अमारा निजी संग्रहमां छे.

•

## ( १ )

नमः श्री सरस्वत्यै ॥

स्वस्तिश्रीश्रेणियुक्तो वृषभजिनपतेऽगण्यनैपुण्यपुण्य-
लावण्यानल्पजल्पप्रवरगुणगणैर्गीयमानः सदानः ।
ज्ञानध्यानप्रतानः कुमदधरणिभृद्वज्रिवज्राग्रजाग्रत्-
सामग्र्योदग्रकाग्रस्तबहुलविलसत्सत्प्रभावप्रभाव ॥१॥

कर्तृ-कर्म-क्रियागुप्तम् । स्रग्धराछन्दः ।

इन्द्रद्वैवेन्द्रचन्द्रप्रकरहिमभरक्षीरधिक्षीरहीर-
डिण्डीरक्षीरनीरप्रभवशुचिलसत्कान्तिशुक्लीकृताशः ।
नित्यानन्तैकवासो जगति परिसरद्ध्वान्तविध्वंसदक्षः,
श्रीमन्नर्हन्मृगाङ्क प्रथितपृथुयशः कौमुदं वर्द्धय त्वम् ॥२॥

[श्लेषालङ्कारः] स्रग्धराछन्दः ।

वीरं हेमाद्रिधीरं नमदमरभरं यादवश्रेणिवर्ण्यं
सामोदं मेदिनीनं विहितविहितकृद्विश्वविश्वप्रकाशम् ।
शश्वत्कृष्णश्ववंती द्विपपतिविलसत्सत्प्रभावैजयन्ती-
रुद्यद्दीप्तीर्दधानं प्रवरजिनपतिं नीरजाङ्कं नमामः ॥३॥

प्रसिद्धनाममालानामगर्भितम् ।

वर्ण्यो वर्ण्यै(र्ण्यै)कवर्ण्यो विमलकमलभद्वर्णवर्णैकवर्ण्यः
निर्हिंसो हंसहंसो दुरिततमतमोहंसहंसैकहंसः ।
श्रीपार्श्वः पार्श्वपार्श्वः कुमदविटपभृत्पार्श्वपार्श्वः सुपार्श्वो
राज्याद्राजाधिराजः शठकमठहठाभ्राजिराजैकराजः ॥४॥

[वर्णालङ्कारः]

सिद्धार्थोऽद्धार्थवेत्ता प्रवरनृपतिसिद्धार्थसिद्धार्थपुत्रः
तीर्थाधीशः सुधीशप्रणतपदयुगः साधुतीर्थोपदेष्टा ।
प्रोद्यत्प्रोद्दामधामद्युमणिपरिसरत्स्वर्णवर्णप्रवर्णं
श्रीमच्छ्रीवर्धमानो भवतु भवभिदे श्रेयसे वर्धमानः ॥५॥

[वर्णालंकारः] स्रग्धरावृत्तम् ।

अथाग्रतो नगरप्रवरवर्णनं प्रारभ्यते –

यस्मिन् संलिह्यतेऽहर्निशममि(म)लरुचामभ्रमभ्रंकषाभि-
र्येषां सत्केतनानां ततिभिरथ चलद्वस्त्रजिह्वाछलेन ।
गंगारंगत्तरंगस्फुरदमलचलत्काशसंकाशभासः
प्रासादास्ते विभान्ति प्रचुररणरणद्घण्टिकान्तःप्रदेशाः ॥६॥
अखर्वगर्वहवैश्च दुर्दान्तोद्दान्तदन्तिभिः ।
रथैः पादातिकैर्यत्र, प्राज्यं राज्यं विराजते ॥७॥

क्रीणन्ति क्रयिणः क्रयाय किरणव्रातावृतान् सुन्दरान् ।
सर्वोत्कृष्टतरान् मयूखनिकरध्वस्तान्धकारव्रजान् ।
रत्नांश्चारुविचित्रचित्रनिचयैश्चारूणि वस्त्राणि च
यत्रानल्पसुकल्पतल्पकलितः शृङ्गाटकः शोभते ॥८॥
अतिलसत्कनकाभरणस्फुरन्मणिगणद्युतिदीपितदिग्गणाः ।
गुणगणप्रथिताः पृथुपौरुषा अपरुषाः पुरुषा प्य(अ)रुषान्विताः ॥९॥
विमलकमलनेत्रं प्रस्फुरच्चन्द्रवक्त्रं
मृदुतरतलहस्तं रूपसम्पत्प्रशस्तम् ।
कलितललितगात्रं स्फीतिमत्प्रीतिपात्रं
अविरतमभिरामं स्त्रीकुलं यत्र कामम् ॥१०॥
तदुपकण्ठमहीकमलाकरा गतसनत्कमलाः कमलाकराः ।
ददति यत्र मुदं कमलाकराः विमलचारुलसत्कमलाकराः ॥११॥
सदकदम्बकदम्बकदम्बकं मतिविशालविशालविशालकम् ।
विमलपुष्करपुष्करपुष्करं भवति यत्र च काननकाननम् ॥१२॥
कलहंसकृतारावा वाप्यः पीनपयोधराः ।
विटपीताः सदा भान्ति यत्र वारांगना इव ॥१३॥ [श्लेषालङ्कारः]
ये तं जगति विख्यात-मुत्तममुत्तमप्रदम् ।
प्रकामं **वीरमग्रामं** सुप्रतिष्ठमधिष्ठिताः ॥१४॥

अथ श्रीपूज्यानां प्रशस्तिः –

पवित्रं यद्गात्रं रुचिररुचिपात्रं प्रकृतितः
कलाभिः संयुक्तं विमलधवलांशुकवृतम्(?) ।
बभौ रत्नश्रेणीयुतकनकसिंहासनवरे,
यथा चान्द्रं बिम्बं प्रवरमुदयाख्ये **शिखरिणी** ॥१५॥

शिखरिणीवृत्तमेतत् ।

रजतपरिसरद्रोचिःस्तोमप्रकाशितदिङ्मुखे,
नयनसुखदे दृष्टे दोषाभिराजियदानने ।
क इह मनुजः सम्पूर्णि_(म्नि?)न कौमुदवर्द्धिणि
प्रदधति भृशं प्रीतिं स्फीतां मनो**हरिणी**प्सिते ॥१६॥ हरिणीवृत्तम् ॥

येषां वै प्रवलदशुक्रतारकान्त-
नेत्रे द्वे दधत इह प्रभूतशोभाम् ।
भ्राम्यत्कभ्रमरसुकेतकद्वयस्य
अत्यर्थं सुजनमनः **प्रहर्षिणीष्टे** ॥१७॥ प्रहर्षिणीछन्दः ।
प्रवररससमेता प्रोल्लसद्वर्णवर्ण्या,
बहुतरसुमनोभिर्निर्भरं स्तूयमाना ।
विलसति खलु येषां वाक्सनत्सूत्रसंगा
वरतरगुणमाला**मालिनी** मालिकेव ॥१८॥ मालिनीछन्दः ।
सद्यो ह्यानवद्यप्रबहुलविलसद्गद्यपद्यादिविद्या
सामस्त्यध्वस्तगर्वा कृतजितबहुलोन्नादिवादिव्रजानाम् ।
येषां येषां हि तेषां पदकमलयुगं वन्द्यतेऽहर्निशं वा
क्षामक्षेमक्षमाभृत्ततिभिरथ लसन्मौक्तिक**स्रग्धराभिः** ॥१९॥ स्रग्धरावृत्तम् ।
सिद्धान्तसिद्धान्तविचारसारान् कूपारसंप्राप्तसमस्तपारान् ।
उद्यद्बहूद्दाममदाद्रिवृन्द-**भेदेन्द्रवज्रा**मितसत्प्रभावान् ॥२०॥ इन्द्रवज्रावृत्तम् ।
अथातिमात्रं चरणोज्झितांश्च सदा स्फुरत्कोकनदांह्रियुग्मान् ।
कोपक्रमान्वीतसुमानसानपि(सांश्च) समस्तविध्वस्तकु**कोपजाती**न् ॥२१॥
उपजातिवृत्तम् ।

प्रवरपञ्चमहाव्रतधारकान् सकलमानवमानवपूजितान् ।
विहगराजिविराजिविराजितान् **द्रुतविलम्बित**सद्गतिसुन्दरान् ॥२२॥
द्रुतविलम्बितवृत्तम् ।

सद्गच्छमानससरोवरराजहंसान्
अज्ञानताततिमिरैकविघातहंसान् ।
कार्यघ्नविघ्नबलवत्तरदन्तिहिंसा-
**सिंहोद्धतान्** परिसरत्क्षितिसत्प्रशंसान् ॥२३॥ सिंहोद्धताछन्दः ।
षट्त्रिंशद्गुणभूरिसम्भृतयशःशुक्लीकृताशामुखान्
सिद्धिव्योमनिशाकरप्रमितिभृच्छ्रीभिः सदा संयुतान् ।
श्रीमत्पूज्य**विवेकचन्द्र**मुनिभृन्मुख्यानमानोपमान्
तान् सन्देहमृगौघघातनविधौ **शार्दूलविक्रीडितान्** ॥२४॥
शार्दूलविक्रीडितवृत्तम् ।

( २ )

## मुन्द्रानगरे श्रीवृद्धिसागरगणिवरान् प्रति पत्रम्

स्वस्तिश्रियां धाम महाविराम-श्रीकामसुत्राम--- धामा ।
श्रीगौडिकाख्यः प्रभुपार्श्वनाथः सदा श्रिये स्तात् प्रभुतासनाथः ॥१॥
इन्दुं कैरविणीव कोकपटलीवाम्भोजिनीबान्धवं
मेघं चातकमण्डलीव मधुपश्रेणीव पुष्पाकरम् ।
भव्यानां नयनालिकामृतधिया द्रष्टुं यमुत्कण्ठते
स श्रीमान**मराब्धिसूरिसुगुरुः** कल्याणमाकल्पताम् ॥२॥
**श्रीस्तम्भतीर्था**दलकासतीर्थ्यात् सूरीश्वरा वार्षिकपर्वलेखम् ।
लिखन्ति **विद्यादिमसागराः** श्रीसमस्तभट्टारकचक्रचक्रिणः ॥३॥
**श्रीमुनराबंदिरे वा.श्रीवृद्धिसागरगणिवरेषु-**
सुखसंयमयात्रात्र सत्रा कल्याणमालया ।
श्रीगुरूणां कृपादृष्टेः सत्प्रभावात् प्रवर्तते ॥४॥

अथ प्रस्तुतम् ।

विहर्तुमुत्कमानसो(सा) सदा बभूविमो वयं,
**सुदाक्षिणात्यजालनापुरस्थसुस्थभाविनाम्** ।
त्रिवार्षिकीं निमन्त्रणां चिकीर्षवः फलोन्मुखीं
तदैहिकार्घ्यगेहिनामिति प्रवृत्तिरागमत् ॥५॥
श्रीपूज्या यद्यस्मान् सौवान् सुश्रावकान् विजानीथ ।
तदवश्यं वन्दाप्यः संघोऽयं किं बहूक्तैः स्यात् ॥६॥
तेषामत्यादरतः सुदिने प्रस्थाय **तरणिपुर**नगरात् ।
वैशाखमासि कृष्णेऽप्येकादश्यां भृगोवारि ॥७॥
उपतीर्थमिता यावत्तावत् सङ्घेन पूःप्रवेशार्थम् ।
आनीतोऽहमहमिकोत्कलिकाकलितः सुपौरजनः ॥८॥ युग्मम्
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः,
हया वेला(लो)द्वेलज्जनप्रगुणवेलावलगिताः ।
नृवाहिन्योऽनन्योपमघनरुचो (चः) स्रस्तकवचा,
रथा सच्चीत्काराः प्रबलबलपादातिकगणाः ॥९॥

नीताः सङ्घैरभिमुख-मातोद्याल्यस्तथा मगधजाल्यः ।
जातो जयजयशब्दः पूरितदिङ्मण्डलोऽविकलः ॥१०॥
तलस्तनि[त]गाननिःस्वानसकर्णीकृतशचीपतिजाहं,
सौवर्णराजतमुद्रिकामानदानखर्वितवारिवाहं;
नृत्यत्सुगात्रपात्रानेकवाद्यातोद्यध्वनिबधिरितदिगन्तं;
लोकलोचनचकोरास्तोका(क) बिब्बोककारित[त]न्महोत्यन्तम् ॥
चित्रदण्डकपद्यं ।

एवं महोत्सवं कृत्वा नीत्वा महदुपाश्रयम् ।
श्रीफलपूगादीन्दत्त्वा संघो लेभे महाकीर्तिम् ॥१२॥ पञ्चभिः कुलकम् ।
**श्रीश्रीस्तम्भन**मण्डन-**जीरापल्लीश**पार्श्वनाथौ च ।
अन्या अपि तीर्थाल्यो नमस्कृताः कीर्तिताश्च ततः ॥१३॥
अथ प्रभाते प्रारब्धं व्याख्यातुं संघसंसदि ।
**नन्दीसूत्रं** वृत्तियुक्त-मस्माभिर्बहुभेदतः ॥१४॥
देशनया पेशलया पुष्करवरमेघसारधारिकया ।
इव गृहभृत्**कल्याण-माणिक-सचवीर**संज्ञानाम् ॥१५॥
सश्रीकानां हृदयेऽप्यभिलाषाबीजमङ्कुरितमित्थम् ।
तत्किंचिदाचरामो येन स्यान्नु जनुः सफलम् ॥१६॥ युग्मम् ।
**चन्द्रप्रभ**तीर्थेश्वर-श्रीमच्छ्री**शान्तिनाथ**मूर्तेश्च ।
जैनागमगुरुवचनैः प्रारब्धा तैः प्रतिष्ठा वै ॥१७॥
सधवनववधूनां किङ्किणीक्वाणरम्या,
प्रबलधवललूलूध्वानसन्मानगम्या ।
नवनवरवजाग्रद्गात्रसत्पात्रनृत्य-
प्रकरणकरणैर्द्राग् धूनिताचार्यशीर्षा ॥१८॥
गणपतिस्थितिजुष्टा देवताध्वानश्रेष्ठा,
कृतशुभजलयात्रा शुद्धनिर्माणमात्रा ।
श्रितनयनशलाका स्वीयवंशे पताका
भविकमिलनशिष्टास्तैः कृता श्रीप्रतिष्ठा ॥१९॥
आषाढमासे विमले नवम्यां शुक्रवासरे ।

कृत्वा प्रतिष्ठां ते प्रापुः प्रतिष्ठां भुवि भूयसीम् ॥२०॥

चतुर्भिः कलापकम् ।

तस्यां प्रतिष्ठिकायामस्माभिः सच्च यद्यदुपदिष्टम् ।
वाचामगोचरतरं तत्कियल्लिख्यते यत्र (पत्रे) ॥२१॥

अथ च –

कुर्वत्सु च क्रियाकाण्डं विनेयान् पाठयत्सु च ।
कारयत्सु जिनेन्द्रार्चां जिनेन्द्रभुवनेऽनघे ॥२२॥ त्रिभिर्विशेषकम् ।
भाणयत्सु च श्राद्धार्भान् षडावश्यकमुत्तमम् ।
श्राविकाणां जिनेन्द्राणां गीताद्युपदिशत्सु च ॥२३॥
एवमनारतमाविःकृतसस्नेहं सरणरणकं च ।
प्रचलत्सु धर्मकर्मसु समागमत् पर्वणां नेता ॥२४॥ त्रिभिर्विशेष्यकम् ।
तदागमेऽथ श्रीसङ्घः सर्वत्रामारिघोषणाम् ।
अवादयज्जगज्जन्तु-जीवातृकसहोदरीम् ॥२५॥
तदा **दोसी गुलालाख्यः** कल्पसूत्रं निजे गृहे ।
नीत्वा तस्य महो जाग-र्य्यादि सर्वमचीकरत् ॥२६॥
प्रातर्गजारूढकुमारहस्त-संन्यस्तपुस्तः ससमस्तसंघः
अनस्तभावः स च कल्पसूत्र-मस्मत्करेऽदाद्विशदागमं तत् ॥२७॥
अस्माभिस्तत्सदाख्यातं व्याख्यातं संघसंसदि ।
व्याख्यानदशकैः पूजा-प्रभावनाप्रभावितैः ॥२८॥
सांवत्सरिकपर्वाहे सूत्रितं ज्ञानसिन्धुना ।
सूत्रतः श्रीकल्पसूत्रं गच्छसूत्रविदा हृदा ॥२९॥
चैत्यप्रपाटिकामथ बंद्युद्वानं गुरोश्च गुणगानम् ।
क्षामणदानपुरस्सर-सांवत्सरिकप्रतिक्रमणम् ॥३०॥
मोदकपेटकपूगैः सांवत्सरिकप्रदानमुत्तानम् ।
सविवेकी श्रीसङ्घः सदा सुरङ्गः प्रकुरुते स्म ॥३१॥ युग्मं
पारणाधिकारः ।
राधामायाः पारणकं **गान्धिको वीरपालो**ऽपि ।
लोपितकर्मवितानः सत्पक्वान्नैर्ददाति स्म ॥३२॥

दत्ते स्म **सवजीया** पारणकं ज्येष्ठशुद्धराकायाः ।
ज्येष्ठवदिपाक्षिकस्य च **सा.सचवीरो** महाभक्त्या ॥३३॥
आषाढचतुर्मास्याः पारणकं सप्तभेदपक्वान्नैः ।
अददात् **सा.वेलजीको** रत्नं **सा.रत्नजिद्वंशे** ॥३४॥
आषाढवदिकपाक्षिक-पारणकं **सा.अभा** प्रददौ ।
श्रावणराकाभुक्तिं **सा.पनजी हेमजित्** प्रददे ॥३५॥
असितश्रावणपाक्षिक-पारणकं सत्सुखी **सखीगोडी** ।
त्रैलाधरपारणकं प्रत्तं **माणिक्य**संज्ञेन ॥३६॥
अदित श्रेष्ठी(ष्ठि) **कल्याणो दीपचन्द्रः** सुबान्धवः ।
श्रीवार्षिकपारणकं मनोमोदकमोदकैः ॥३७॥
सबलीकर्तुं पारणगर्वं स्व**धर्मचन्द्र**सच्छ्रेष्ठी ।
**पनजीपुत्रः** प्रादात् पारणकं दुर्बलाष्टम्याः ॥३८॥
तप्तं तपः सुजप्तं द्वाभ्यां विधिना च विंशदुपवासं ।
श्राद्धीपञ्चकमर्घ्यं पक्षक्षपणं तपस्तेपे ॥३९॥
तद्वद्दशोपवासं श्राद्धीदशकं तपः प्रतपते स्म ।
सप्तदशाष्टाहिकका दशभक्तं पञ्चदशसंख्यम् ॥४०॥
संख्यातीतानि जातानि षष्ठाष्टमतपांस्यपि ।
जज्ञे विविधपक्वान्नैर्भक्तिरष्टमकारिणाम् ॥४१॥
संशीलयन्ति शीलं सत्यं धनाः(न्याः) श्रावकाः
श्राद्ध्योऽपि च महासत्यः सत्यं शीलं न भिन्दन्ति ॥४२॥
दातव्यं लातव्यं परिहर्तव्यं तथा च कर्तव्यम् ।
दानं ज्ञानं मानं ध्यानं स्याद् भावना भविनाम् ॥४३॥
एवमत्रत्यं सत्कृत्यं पार्वणं नु निवेदितं ।
भवद्भिस्तच्च, तत्रत्यं कर्त्तव्यं पत्रगोचरम् ॥४४॥

अत्रत्यानां मुनिश्री**सुन्दरसागरगणि**-मुनिश्री**ललितसागरगणि**-मु. **गुलालसागरगणि** - मुनिश्री **कपूरसागरगणि** - मु. **वलभसागरजी** - मु. **ज्ञानसागरगणि** - मु. **हितसागरगणि** - मु. **विमलसागरगणि** - चिरं. **कृपाचंद-कस्तूरचंद**प्रभृतीनां वन्दना ज्ञेया । संघस्य धर्मलाभो लाभ्यः ।

मुनिश्री **ललितसागरगणिलिखितं** । मु. **कपूरसागरगणिनी** वंदणा ।

[अहीं पत्र पूरो थाय छे. ते पछी सं. १७८१नी पर्वतिथिनी टीप लखी छे. तेनी नीचे अन्य हस्ताक्षरमां एक पत्र लखायेलो छे :]

तथा तुमे योग्य, गीतारथ, गरढा, डाहा, चतुर पाटभक्त छो. तुमनै श्री मांडवीनौ आदेश छे ते प्रीछजो. तथा तमारुं पत्र १. हीरसागर हस्ते आव्युं तेहथी समाचार सर्व जाण्या, पणि तुमे डाहा हता अनै एहनै इहां मोकल्यौ ए नहतुं घटतुं । क्षेत्रनुं समाधान करीनैं मूक्यो होतै तो जिम तुमे लिखत तिम करत, पणि क्षेत्रनुं समारवै तुमे सर्व वातै समर्थ हता अनैं पडतुं मेल्युं ते तुमनै न घटै. माटै एहनौ उद्यम करवो सही २. मु. प्रेमसागर - मु. सहजसागरनै साता पूछवी । वलता पत्र संभारी लिखवा । पोस वदि १३ गुरौ. ठा. वीरानै उपगार करावजौ ।

जैन देरासर
नानी खाखर-३७०४३५
कच्छ, गुजरात

# १२ बोल – पट्टक : बालावबोध

– सं. मुनि श्रुताङ्गचन्द्रविजय (सोमशिशुः)

प्रस्तुत कृति 'बार बोलनो पट्टक'ना बालावबोधरूप छे. जगद्गुरु श्रीहीरविजयसूरीश्वरजीअे सं. १६४६ना पोष शुदि १ने दिवसे शुक्रवारे पाटणमां तपगच्छनो चतुर्विध संघ एकठो करी जैन संघनी अेकता माटे बार बोलनो पट्टक बनाव्यो हतो.

आ पट्टक पर पंडित श्रीशुभविजयजीअे सं. १६८०मां बालावबोध रच्यो छे. पंडित श्रीशुभविजयजी जगद्गुरु श्रीहीरविजयसूरीश्वरजीना शिष्य छे. (जैन परम्परानो इतिहास, भाग-३ पुस्तकमां पृष्ठ ३६४ पर पण्डित श्रीशुभविजयजीने महो. श्रीकल्याणविजयजीना शिष्य बताव्या छे परन्तु श्रीशुभविजयजी रचित 'सेनप्रश्न'नी अने प्रस्तुत कृतिनी प्रशस्तिमां ग्रन्थकार श्रीशुभविजयजी पोताने श्रीहीरविजयसूरीश्वरजीना शिष्य ज दर्शावे छे, महो. श्रीकल्याणविजयजीनो नामोल्लेख पण नथी करता.) 'सेनप्रश्न'नी प्रशस्ति अनुसार श्रीशुभविजयजीअे तर्कभाषावार्तिक, काव्यकल्पलतामकरन्द, स्याद्वादभाषासूत्र तथा तेनी वृत्ति, काव्यकल्पलतावृत्ति इत्यादि ग्रन्थोनी रचना करी छे.

प्रस्तुत कृतिनी रचनाशैली आ प्रमाणे छे : पहेलां जे-ते बोलनी जरूर शा माटे छे ते जणावी, त्यारबाद बोलनुं समर्थन करनारा शास्त्रपाठो आपी, ते शास्त्रपाठोनुं यथायोग्य विवेचन करी, अन्ते बोलनो उल्लेख कर्यो छे. शास्त्रपाठोने जोता ग्रन्थकारश्रीनी विद्वत्तानो सहजताथी ख्याल आवी जाय छे.

आचार्य श्रीविजयशीलचन्द्रसूरिजी महाराजे प्रस्तुत कृतिना सम्पादन माटे पोताना अंगत संग्रहमांथी प्रत आपी छे. पूज्य आचार्य महाराजे तथा मुनिश्रीत्रैलोक्यमण्डनविजयजी महाराजे प्रस्तुत कृतिनुं सम्पादन करवामां घणी मदद करी छे. ते माटे हुं तेओश्रीनो खूब ऋणी छुं.

अन्ते, हस्तप्रत-सम्पादननो आ मारो पहेलो ज अनुभव छे. तेथी आमां घणी बधी क्षतिओ रही गई हशे. ते माटे क्षमा करवा अने ध्यान दोरवा विद्वज्जनोने नम्र विनंति.

•

भट्टारकपुरन्दरभट्टारकश्रीहीरविजयसूरीश्वरपट्टालङ्कारहारभट्टारकभट्टारकश्री-विजयसेनसूरीन्द्रतत्पट्टपूर्वाचलसहस्रांशुसमानसम्प्रतिविजयमानभट्टारकश्रीविजय-देवसूरिगुरुभ्यो नमः ।

बार बोलनुं अर्थ लिखीय छइ ।

यथा –

''फरुसवयणेण दिणतवं अहिक्खिवंतो हणइ मासतवं ।
वरिसतवं सवमाणो हणइ हणंतो अ सामन्नं ॥३४॥''

इत्युपदेशमालाद्वितीयशतके ।

